स्वर्णजयन्तीवर्षम् 2019-20

श्रीमद्वाजसनेयिमाध्यन्दिन-

# शतपथ-ब्राह्मणम्

श्रीमत्त्रयीभाष्यकार-सायणाचार्यविरचित-
वेदार्थ-प्रकाशाख्यभाष्यसमेतम्।

तत्र

प्रथमद्वितीयकाण्डात्मकः पञ्चदशप्रपाठकः

प्रथमो भागः

केन्द्रीयसंस्कृतविश्वविद्यालयः
संसदः अधिनियमेन स्थापितः
(प्राक्तन राष्ट्रियसंस्कृतसंस्थानम्, मानितविश्वविद्यालयः)
भारतसर्वकारस्य मानवसंसाधनविकासमन्त्रालयाधीनः

स्वर्णजयन्तीवर्षम् 2019-20

ॐ

श्रीमद्वाजसनेयिमाध्यन्दिन-

# शतपथ-ब्राह्मणम्

श्रीमत्त्रयीभाष्यकार-सायणाचार्यविरचित-

वेदार्थ-प्रकाशाख्यभाष्यसमेतम्।

उपर्युक्तभाष्यानुपलब्धिस्थाने-

सर्वविद्यानिधानकवीन्द्राचार्यसरस्वती-

श्रीहरिस्वामिभाष्यसमेतं च।

बहुभिर्विद्वद्भिः परिशोधितं च।

तत्र

प्रथमद्वितीयकाण्डात्मकः पञ्चदशपथसंज्ञकः

## प्रथमो भागः


**केन्द्रीयसंस्कृतविश्वविद्यालयः**

संसदः अधिनियमेन स्थापितः

(प्राक्तनं राष्ट्रियसंस्कृतसंस्थानम्, मानितविश्वविद्यालयः)

भारतसर्वकारस्य मानवसंसाधनविकासमन्त्रालयाधीनः

**Published with the Financial Assistance from Central Sanskrit University, Ministry of Human Resource Development, Govt. of India**

Publisher :
**Registrar**
**Central Sanskrit University**
(Formerly Rashtriya Sanskrit Sansthan, Deemed to be University)
56-57, Institutional Area, Janakpuri, New Delhi-110058
EPABX : 28524993, 28521994, 28524995
website : www.sanskrit.nic.in

Reprint - 2002
Reprint - 2020

Price ₹ 2115-00 (Per Set)

Printed by :
**D.V. Printers**
97-U.B., Jawahar Nagar, Delhi-110007

# आमुखम्

लोककल्याणाय परमकारुणिकाः ऋषयः आचार्याः च वेदान् पुराणानि शास्त्राणि च महता परिश्रमेण प्रणिनिन्युः। तेषाम् उपबृह्मणरूपाः नैके ग्रन्थाः विद्वद्भिः विरचिताः विरच्यमानाः सन्ति। अधीतिः, बोधः, आचरणम्, प्रचारणम् इति विद्यायाः चतुर्षु प्रकारेषु प्रचारणमपि अन्यतमम्। पूर्वसूरिभिः महता प्रयासेन लिखितानां ग्रन्थानां प्रकाशनेन ग्रन्थसुमनगतगहनविचारसुगन्धोऽपि सर्वत्र प्रसरेत्। तेन विद्यायाः प्रचारोऽपि सिध्यति। यद्यपि केचन ग्रन्थाः महता प्रयासेन द्रविणव्ययेन च प्रकाशमानीताः किन्तु ते ग्रन्थाः कालान्तरे दुर्लभतां गताः। तेन संस्कृतग्रन्थानाम् अधिजिगीषूणाम् अनुसन्धित्सूनां च काठिन्यं समजनि। भारतशासनान्तर्गतमानव-संसाधनविकासमन्त्रालयस्य पूर्वप्रकाशितानां दुर्लभानां च ग्रन्थानां पुनर्मुद्रणात्मक-परियोजनायां पुनर्मुद्रिताः अपीमे ग्रन्थाः कालक्रमेण भूयोपि दुर्लभतां जग्मुः। अतः पुनर्मुद्रणं कारयित्वा ग्रन्थानां सुलभता संपादनीया इति मन्त्रालयस्य सङ्कल्पमनु ग्रन्थरत्नानां पुनर्मुद्रणं प्रकाशनं च विधास्यते।

सन्दर्भेऽस्मिन् अपेक्षितं मार्गदर्शनं प्रदाय केन्द्रीयसंस्कृतविश्वविद्यालयं समेधितवद्भ्यः मानवसंसाधनविकासमन्त्रिवर्येभ्यः **डॉ. रमेश पोखरियाल निशंक** महाभागेभ्यः आधमर्ण्यं बिभर्मि। प्राशासनिकसहाय्यं विधाय कार्यसाफल्याय सहकृतवते मानवसंसाधनविकासमन्त्रालयस्य भाषाविभागस्य संयुक्तसचिवाय **श्री संजय कुमार सिन्हा** महाभागाय तद्विभागीयाधिकारिभ्यः कार्तज्ञ्यं संदिशामि।

संकल्पस्यास्य साकारतासंपादने प्रयासं कृतवन्तं विश्वविद्यालयस्य शोध-प्रकाशनविभागस्य उपनिदेशकं डा. मधुकेश्वर भट्टं तद्विविभागीयान् च साधुवादैः संभाजयामि। योग्ये काले सुन्दरं पुनर्मुद्रणं विधायोपकृतवते डी.वी. प्रिन्टर्स मुद्रणालयस्य अधिकारिणे साधुवादान् व्याहरामि। आशासे भूयः कृतानेन मुद्रणप्रयत्नेन विद्वांसः, छात्राः, संस्कृतानुरागिणः, लाभान्विताः भूयासुः इति।

भवतां विधेयः
**परमेश्वरनारायणशास्त्री**
कुलपतिः
केन्द्रीयसंस्कृतविश्वविद्यालयः

न्तरꣳ हीयꣳ रथन्तरꣳ हि तद्रूपꣳ ह्वयति वा ऽअनुवाक्यया प्रयच्छति याज्यया तस्मादनुवाक्यायै रूपꣳ हुवे हवामह ऽआगच्छेदम्बर्हिः सीदेति यद्ध्वयति हि तया प्रयच्छति याज्यया तस्माद्याज्यायै रूपं वीहि हविर्जुषस्व हविराव्वृषायस्वाद्धि पिब प्रेति यत्प्र हि तया यच्छति॥१७॥

सा या पुरस्ताल्लक्षणा । सानुवाक्या स्यादसौ ह्यनुवाक्या तस्या ऽअमुष्या ऽअवस्ताल्लक्ष्म चन्द्रमा नक्षत्राणि सूर्यः ॥ १८ ॥

---

अनुवाक्यया, प्रयच्छति याज्यया । तस्मादनुवाक्यायै रूपम्–हुवे, हवामहे, आगच्छ, इदम्बर्हिः सीद–इति । यद् ह्वयति हि तया । प्रयच्छति याज्यया–तस्माद् याज्यायै रूपम्–वीहि, हविर्जुषस्व, हविरावृषायस्व, अद्धि, पिब, प्र, इति यत्प्र हि तया यच्छति ॥ १७ ॥

सा या पुरस्ताल्लक्षणा–सानुवाक्या स्यात् । असौ ह्यनुवाक्या । तस्या अमुष्या अवस्ताल्लक्ष्म,–चन्द्रमा नक्षत्राणि सूर्यः ॥ १८ ॥

---

ब्रूयात् । अह्वतिर्गत्यर्थः ‘ पर्यह्वयाते ’ ( ऋ० मं० १० सू० १६ ऋ० ७ ) । उक्तविधानुवचनं ‘ बृहत् ’ साम्ना ( सा० सं० आ० गा० १. १. २७ ) स्तौति–असौ हीति । ‘ अनुवाक्या ’ ‘ असौ ’ द्यौः, एवं ‘ बृहत् ’ सामापि द्यौः ( ता० ब्रा० १६ । ११ । ) ( तै० ब्रा० ३. ९. १३ ) । ‘ हि ’ यतो द्युभागोऽनुवाक्या बृहत्साम, ‘ तत् ’ तस्मात् तद्गतं मन्द्रत्वं ‘ बार्हतं ’ बृहतीसम्बन्धि ‘ रूपम् ’ ॥

याज्याया उच्चारणे धर्ममाह–क्षिप्र एव याज्ययेति । ‘ याज्यया ’ निमित्तया उच्चारणे वर्णविषयां त्वरां कुर्यात् । इयं हीत्यादि ( सा० सं० आ० गा० २. १. २१ । ) ( तै० ब्रा० ३. ९. १३ । ) पूर्वापेक्षया त्वरतीति ‘ तत् ’ क्षिप्रोच्चारणं ‘ राथन्तरम् ’ ( ता० ब्रा० १६. ११ ) ।

अथ पुरोनुवाक्यायाज्ययोर्लक्षणान्यन्यानि वक्तुं कार्यभेदमाह–ह्वयति वा इति । ‘ अनुवाक्यया ’ यष्टव्यदेवान् आह्वयति, तानेव ‘ याज्यया ’ यजति । ‘ तस्मात् ’ आह्वानार्थत्वात्, आह्वानार्थं यल्लिङ्गम्, तत् ‘ अनुवाक्याया रूपम् ’ तानि लिङ्गानि दर्शयति–हुव इत्यादिना । ‘हि’ यस्मात् ‘ तया ’ अनुवाक्यया यष्टव्यदेवान् आह्वयति, तस्मादाह्वानप्रकाशकं “ हुवे ”–इत्यादि यल्लिङ्गजातम्, तद्वत्येव सर्वत्रानुवाक्या कार्येत्यर्थः ॥

प्रयच्छति याज्ययेत्यादि । यस्माद् याज्या हविःप्रदानसाधनम्, ‘ तस्मात् ’ अस्याः तत्प्रदानप्रकाशकं लिङ्गं ‘ रूपम् ’ । अभिहितलिङ्गानि दर्शयति–वीहीति । ‘ हि ’ यस्मात् ‘ तया ’ याज्यया प्रयच्छति हविः, ‘तस्मात्’ प्रदानप्रकाशकं यद् “ वीहि ”–इत्यादिलिङ्गम्, तद्वत्येव सर्वत्र याज्या कार्येत्यर्थः ॥ १७ ॥

लक्षणान्तरमाह–सा या पुरस्ताल्लक्षणेति । ‘ पुरस्तात् ’ मन्त्रस्य पुरोभागे ‘ लक्षणं ’ यष्टव्यदेवनाम यस्यां ‘ सा ’ ‘ अनुवाक्या ’ पुरोऽनुवाक्या । तस्या अवस्ताल्लक्षणत्वे कारणमाह–तस्या इति । ‘ तस्याः ’ पुरोऽनुवाक्यायाः ‘अमुष्याः’ “असौ हि अनुवाक्या” इत्युक्तत्वात् (श० प० कां० १. अ० ७. ब्रा० २. कं०१७)

---

१–शाङ्खायनब्राह्मणमप्यत्रानुसंधेयं “ बार्हतराथन्तरं वषट्कुर्यात्–पुरस्ताद्दीर्घमुपरिष्टाद्ध्रस्वं–यद्ध्रस्वं तद्रथन्तरं–यद्दीर्घं तद्बृहत्–असौ इयं वै रथन्तरं असौ बृहत् । अनयोरेव तत्प्रतितिष्ठति एतावान्वै वाचो विकारः–सर्वेणैव तद्वाचो विकारेण देवेभ्यो हविः प्रयच्छति ” इति । शां. ब्रा. अ ३. ख ५ ।



( यौऽथ ) अथ योपरिष्टाल्लक्षणा सा याज्या स्यादियꣳ हि याज्या तस्या ऽअस्या ऽउपरिष्टाल्लक्ष्मौषधयो व्वनस्पतय ऽआपोऽग्निरिमाः प्रजाः १९

सा ह न्वेव समृद्धानुवाक्या । यस्यै प्रथमात्पदाद्देवतामभिव्याहरति सो ऽएव समृद्धा याज्या यस्या ऽउत्तमात्पदाद्देवताया अधि व्वषट्करोति व्वीर्यं वै देवतर्ऽर्चस्तदुभयत ऽएवैतद्वीर्येण परिगृह्य यस्यै देवतायै हविर्भवति तस्यै प्रयच्छति ॥ २० ॥

स वै व्वौगिति करोति व्वाग्वै व्वषट्कारो वाग्रेतो रेत ऽएवैतत्सिञ्चति षडित्यृतवो वै षट् तदृतुष्वेवैतद्रेतः सिच्यते तदृतवो रेतः सिक्तमिमाः प्रजाः प्रजनयन्ति तस्मादेवं व्वषट्करोति ॥ २१ ॥

---

अथ योपरिष्टाल्लक्षणा–सा याज्या स्यात् । इयं हि याज्या । तस्या अस्या उपरिष्टाल्लक्ष्म–ओषधयः, वनस्पतयः, आपः, अग्निः, इमाः प्रजाः ॥ १९ ॥

सा ह न्वेव समृद्धानुवाक्या–यस्यै प्रथमात् पदाद्देवतामभिव्याहरति । सो एव समृद्धा याज्या–यस्या उत्तमात् पदाद्देवताया अधि वषट्करोति । वीर्यं वै देवतर्चः । तदुभयत एवैतद् वीर्येण परिगृह्य यस्यै देवतायै हविर्भवति-तस्यै प्रयच्छति ॥ २० ॥

स वै वौगिति करोति । वाग्वै वषट्कारः, वाग्रेतः, रेत एवैतत्सिञ्चति । षडिति । ऋतवो वै षट् । तदृतुष्वेवैतद्रेतः सिच्यते । तदृतवो रेतः सिक्तमिमाः प्रजाः प्रजनयन्ति । तस्मादेवं वषट्करोति ॥२१॥

---

सामानाधिकरण्यम् । तस्याः चन्द्रनक्षत्रसूर्याः ‘ अवस्ताल्लक्ष्म ’ अधस्ताल्लक्ष्माणीव; अधोभागे तेषां परिभ्रमणात् । अतोऽस्या अपि तथात्वं युक्तम् ॥ १८ ॥

अथ योपरिष्टाल्लक्षणेति वाक्यं पूर्ववाक्यवद्व्याख्येयम् । ‘ तस्याः ’ याज्यारूपायाः ‘अस्याः’ भूम्याः ॥१९॥

उक्तं पुरस्तादुपरिष्टाल्लक्षणत्वं विशिनष्टि–सा ह न्वेवेति । ‘ यस्यै ’ यस्या अनुवाक्यायाः ‘ प्रथमात् पदात् ’ “ अग्निः प्रत्नेन सोमगीर्भिः ” इत्यादिलक्षणाद् ( ऋ० सं० ८. ४४. १२. तै० ब्रा० ३. ९. ६. ३ । तै०सं० २. ६. २. २ ) यष्टव्यदेवता ब्रूयात्, ‘ सा एव समृद्धा अनुवाक्या ’ । ‘ याज्या ’ तु सा समृद्धा, ‘ यस्या उत्तमात् पदात् ’ “ जिह्वा अग्ने चकृषे ” इत्यादिकात् ( ऋ० सं० १०. ८. ६. । तै० ब्रा० ३. ९. ७. २ । तै० सं० २. ६. २. ८ ) तैरभिहितायाः ‘ देवतायाः ’ उपरि ‘ वषट्करोति ’ । ननु कथं देवतासद्भावमात्रेण समृद्धत्वमिति, तदाह–वीर्यं वा इति । ‘ देवता वै वीर्यम् ’ ऋगाम्नानस्य तत्प्रकाशनार्थत्वात् ( ऋ० सं० १. ९९. ३. ) ॥ २० ॥

अथ याज्यानन्तरभाविनं वषट्कारं विभज्य विधाय प्रशंसति–स वै वौगितीति । ‘ वौगिति ’ उच्चारणं कुर्यात् । तत्प्रशंसति–वाग्वा इति । ‘ वौग् ’–इत्येतदौकारस्थाने आकारे कृते ‘ वाग् ’–इति भवति, अतो ‘ वषट्कारो वाक् ’ । सा च ‘ वाक् ’ ‘ रेतः ’ सेचनसाधनत्वात् । उच्चारणमेव तत्सेकः । तथा षडिति करो-

स्वर्णजयन्तीवर्षम् 2019-20

श्रीमद्वाजसनेयिमाध्यन्दिन-

# शतपथ-ब्राह्मणम्

श्रीमत्त्रयीभाष्यकार-सायणाचार्यविरचित-
वेदार्थ-प्रकाशाख्यभाष्यसमेतम्।

तत्र

तृतीय-चतुर्थ-पञ्चमकाण्डात्मकः
पाशुकसौमिकप्रयोगनिरूपकौ

## द्वितीयो भागः

केन्द्रीयसंस्कृतविश्वविद्यालयः
संसदः अधिनियमेन स्थापितः
(प्राक्तनं राष्ट्रियसंस्कृतसंस्थानम्, मानितविश्वविद्यालयः)
भारतसर्वकारस्य मानवसंसाधनविकासमन्त्रालयाधीनः

स्वर्णजयन्तीवर्षम् 2019-20

ॐ

श्रीमद्वाजसनेयिमाध्यन्दिन-

# शतपथ-ब्राह्मणम्

श्रीमत्त्रयीभाष्यकार-सायणाचार्यविरचित-
वेदार्थ-प्रकाशाख्यभाष्यसमेतम्।

उपर्युक्तभाष्यानुपलब्धिस्थाने-
सर्वविद्यानिधानकवीन्द्राचार्यसरस्वती-
श्रीहरिस्वामिभाष्यसमेतं च।
बहुभिर्विद्वद्भिः परिशोधितं च।

तत्र

तृतीय-चतुर्थ-पञ्चमकाण्डात्मकः
पाशुकसौमिकप्रयोगनिरूपको
**द्वितीयो भागः**


## केन्द्रीयसंस्कृतविश्वविद्यालयः

संसदः अधिनियमेन स्थापितः
(प्राक्तनं राष्ट्रियसंस्कृतसंस्थानम्, मानितविश्वविद्यालयः)
भारतसर्वकारस्य मानवसंसाधनविकासमन्त्रालयाधीनः

Published with the Financial Assistance from Central Sanskrit University,
Ministry of Human Resource Development, Govt. of India

Publisher :
**Registrar**
**Central Sanskrit University**
(Formerly Rashtriya Sanskrit Sansthan, Deemed to be University)
56-57, Institutional Area, Janakpuri, New Delhi-110058
EPABX : 28524993, 28521994, 28524995
website : www.sanskrit.nic.in

Reprint - 2002
Reprint - 2020

Price ₹ 2115-00 (Per Set)

Printed by :
**D.V. Printers**
97-U.B., Jawahar Nagar, Delhi-110007



# माध्यन्दिनशतपथब्राह्मणगतविषयानुक्रमणिका ।

## तृतीयेऽध्वरकाण्डे–

### अथ प्रथमोऽध्यायः ।

### अथ ज्योतिष्टोमयागः ।


| क्रा० | विषयाः | पृष्ठाङ्काः |
|---|---|---|
| १ | आदौ शालाविर्माणप्रभृति–दीक्षाहुतिपर्यन्ताग्निष्टोमेतिकर्तव्यताविधानं तत्र पूर्वं शालानिर्माणार्थं देवयजनपरिग्रहः, तत्रापि समत्वोदक्पूर्वप्रवरणत्वादिधर्मविशेषानुकथनं, देवयजनप्राग्देशे परिमितप्रदेशाधिक्यस्य निषेधः, ऋषीणामाख्यानमुखेन देवयजनस्य प्राचीनवंशत्वानुगतं पक्षान्तरविधानं, प्रसंगाद्दीक्षितस्य शयनविषयकनियमविधानं, वृष्ट्यादिपरिहाराय सर्वतः परिश्रयणविधानं. तत्र–अत्रैवर्णिकानां शूद्रादीनामभिप्राप्तेर्निषेधः दीक्षितस्य सर्वैः सह वाग्व्यवहारस्य निषेधः, समंत्रकशालाप्रवेशकथनं तन्मंत्रव्याख्यानं चेति. | १–६ |
| २ | दीक्षासंस्काराः–तत्र पूर्वमप्सुदीक्षा तस्यां च दीक्षाकालविधानं. दीक्षितस्याशनविषये सर्वान्नाम्यनुज्ञानं, शालोत्तरतः क्षौरार्थं परिश्रयणविधानं, सर्वाङ्गवपनपक्षस्य निराकरणं, सक्रमं सप्रकारकं समंत्रकं वपनविधानं, वपननिमित्ताशुद्धिं परिहर्तुं सप्रकारकं स्नानविधानं. सार्थवादं प्रासङ्गिकपुरुषार्थनियमसहितं समन्त्रकमहतवासःपरिधानविधानं, क्षौरानंतरं स्नातस्य धृतवाससो दीक्षितस्य शालाप्रवेशविधानम्, अत्राप्यवसरे सोपपत्तिकमशनविषयकनियमानुकथनं चेति. | ६–११ |
| ३ | अपःप्रणयने कृत्वा दीक्षाङ्गभूताया आग्नावैष्णवेष्टेः प्रयोगविधानं, तत्र च स्वसमृद्धिफलकामस्यादित्यचरोर्वैकल्पिकं विधानं, तत्प्रसङ्गेन मार्तण्डस्योत्पत्तिः, सामिधेनीनां साप्तदश्यं–प्रयाजानां पञ्चसंख्याकत्वम्–अनुयाजानां त्रित्वं–पत्नीसंयाजानामस्तित्वं–समिष्टयजुषोऽभाव इत्यादिप्रयोगगतविशेषकथनं, ततो दीक्षितस्य सार्थवादं सोपक्रमोपसंहारं स्वधर्मकं नवनीताभ्यङ्गविधानं, पौर्वापर्यक्रमसहितंससाधनं सार्थवादं समन्त्रकं त्रैककुदेनाक्ष्णोराञ्जनविधानं, समन्त्रकं दीक्षितस्य दर्भैः पावनविधानं, तन्मन्त्रव्याख्यानं च, आशीराशंसनं, सप्रकारकं हस्तद्वयेऽप्यङ्गुलीनां न्यञ्चनं तत्साधनमंत्रव्याख्यानं च, दीक्षाहुत्यर्थं शालाप्रवेशनविधानं चेत्यादि. | १२–२४ |
| ४ | एवं दीक्षासंस्कारकरणानन्तरमौद्ग्रभणसंज्ञकानां पञ्चानां दीक्षाहुतीनां विधानम्, एतासामुद्ग्रहणसाधनताया विभागपूर्वकं प्रशंसनं, पुरातनवृत्तान्तप्रदर्शनमुखेनैतेषां स्वर्गोद्ग्रहणसाधनतया उपपादनं, तद्गतपञ्चसंख्यायाः प्रशंसनं, होममंत्र- | |

ग्रहान्गृहीत्वा। (त्वो)उपनिष्क्रम्य विप्रुषाँ होमं जुहोति तद्यद्विप्रुषाँ होमं जुहोति याऽएवास्यात्र विप्रुष स्कन्दन्ति ताऽएवैतदाहवनीये स्वगा करोत्याहवनीयो ह्याहुतीनां प्रतिष्ठा तस्माद्विप्रुषाँहोमं जुहोति॥१॥

स जुहोति । यस्ते द्रप्स स्कन्दति यस्तेऽअँशुरिति यो वै स्तोकः स्कन्दति स द्रप्सस्तत्तमाह यस्तेऽअँशुरिति तदँशुमाह ग्रावच्युतो धिषणयोरुपस्थादिति ग्राव्णा हि च्युतोऽधिषवणाभ्याँस्कन्दत्यध्वर्योर्वा परि वा यः पवित्रादित्यध्वर्योर्वा हि पाणिभ्याँस्कन्दति पवित्राद्वा तं ते जुहोमि मनसा वषट्कृतँस्वाहेति तद्यथा वषट्कृतँहुतमेवमस्यैतद्भवति ॥ २ ॥

ग्रहान्गृहीत्वा उपनिष्क्रम्य विप्रुषां होमं जुहोति । तद् यद्विप्रुषां होमं जुहोति । या एवास्यात्र विप्रुषः स्कन्दन्ति—ता एवैतदाहवनीये स्वगा करोति । आहवनीयो ह्याहुतीनां प्रतिष्ठा । तस्माद् विप्रुषां होमं जुहोति ॥ १ ॥

स जुहोति—" यस्ते द्रप्स स्कन्दति यस्ते ऽअंशुः "–( वा. सं. ७ । २६ ) इति । यो वै स्तोकः स्कन्दति स द्रप्सस्तत्—तमाह । यस्ते ऽअंशुरिति । तदंशुमाह । "ग्रावच्युतो धिषणयोरुपस्थात् "–( वा० सं० ७ । २६ ) इति । ग्राव्णा हि च्युतोऽधिषवणाभ्यां स्कन्दति । "अध्वर्योर्वा परि वा यः पवित्रात्"–( वा० सं० ७ । २६ ) इति । अध्वर्योर्वा हि पाणिभ्यां स्कन्दति, पवित्राद्वा । " तं ते जुहोमि मनसा वषट्कृतं स्वाहा " ( वा. सं. ७ । २६ )–इति । तद्यथा वषट्कृतं हुतम्—एवमस्यैतद्भवति ॥ २ ॥

गतेषु ब्राह्मणेषु प्रातःसवनिकानामुपांश्वादीनां ग्रहाणां ग्रहणं विहितम् । तदनन्तरकर्त्तव्यं बहिष्पवमानस्तोत्रादिकमस्मिन् ब्राह्मणेऽभिधीयते । तत्र तावदभिषवकाले ग्रहणकाले च स्कन्नानां सोमबिन्दूनां स्कन्दनप्रत्यवायपरिहाराय विप्रुषां होमं विधत्ते—ग्रहान्गृहीत्वोपनिष्क्रम्य विप्रुषां होमं जुहोति इति । ' उपनिष्क्रम्य ' हविर्द्धानान्निर्गत्य ' विप्रुषाम् ' अर्थे तत्र स्कन्दनप्रायश्चित्तत्वेन होमं कुर्यादित्यर्थः । यद्यप्यत्र ' जुहोति ' इत्यनेनैव होमं कुर्यादित्ययमर्थो लभ्यते । तथाप्यत्र ' होमम् ' इति पृथगुपात्तत्वाज्जुहोतिनैकदेशलक्षणया करोत्यर्थो लक्ष्यते । यथा " वाचमवोचत् " इत्यत्र । विहितस्य होमस्योपयोगमाह—तद्यद्विप्रुषां होममित्यादि । 'विप्रुषां होमं जुहोति' इति यत्, तत्कारणमुच्यते । 'अस्य' सोमस्य ' विप्रुषः ' अत्र ' ' स्कन्दन्ति' विशीर्णा भवन्ति । ' ताः ' एतेन विप्रुड्ढोमेन ' आहवनीये ' ' स्वगा करोति ' स्वस्थानमाहवनीयं गच्छन्तीति स्वगाः, तादृशीः कृतवान् भवति । यत आहवनीयः सर्वासाम् ' आहुतीनाम् ' ' प्रतिष्ठा ' आधारः । अत उक्तेन होमेन विप्रुषामाहवनीयम्प्रति प्रापणात् स्कन्दनप्रत्यवायो न भवतीत्यर्थः । ' स्वगा ' इति " अन्येष्वपि दृश्यते " ( पा. सू. ३ । २ । १०१ ) इति डप्रत्ययः । ततः स्त्रीलिङ्गाद् द्वितीयाबहुवचनस्य "सुपां सुलुक् " ( पा. सू. ७ । १ । ३९ ) इत्याकारादेशः ॥ १ ॥

विहितहोमे मन्त्रं चतुर्द्धा विभज्य विनियुञ्जानो मन्त्रस्य प्रथमभागे द्रप्सपदस्यार्थमाह—स जुहोति यस्ते द्रप्स इत्यादि । यो वै स्तोक इत्यादि । ' स्तोकः ' लघ्नो बिन्दुः स द्रप्सशब्दार्थः । अतोऽत्र ' तत् ' द्रप्सपदं ' तम् ' स्तोकम् ' आह ' इत्यर्थः ॥

१–अध्वर्युप्रतिप्रस्थातृप्रस्तोत्रुद्गातृप्रतिहर्तृसुब्रह्मण्याः समन्वारब्धा निष्क्रामन्ति । अध्वर्युः प्रथमो यथासंख्यमितरे । का. श्रौ. सू. ९-१४९-१५०। २–हुत्वा वा समन्वारभेरन् । यस्त इति विप्रुषां होमं जुहोति । अध्वर्युर्वा जुहोति । का. श्रौ. सू. ९।१५१-१५२।





( त्यु ) अथ स्तीर्णायै वेदेः । ( द्वे ) द्वे तृणेऽअध्वर्युरादत्ते तावध्वर्यू प्रथमौ प्रतिपद्येते प्राणोदानौ यज्ञस्याथ प्रस्तोता वागेव यज्ञस्याथोद्गातात्मैव प्रजापतिर्यज्ञस्याथ प्रतिहर्ता भिषग्वा व्यानो वा ॥ ३ ॥

तान्वाऽएतान् । पञ्चर्त्विजो यजमानोऽन्वारभतऽएतावान्वै सर्वो यज्ञो

अथ स्तीर्णायै वेदेः द्वे तृणेऽअध्वर्युरादत्ते । तावध्वर्यू प्रथमौ प्रतिपद्येते प्राणोदानौ यज्ञस्य । अथ प्रस्तोता वागेव यज्ञस्य । अथोद्गाता आत्मैव प्रजापतिर्यज्ञस्य । अथ प्रतिहर्ता भिषग्वा व्यानो वा ॥ ३ ॥

तान्वाऽएतान् पञ्चर्त्विजो, यजमानोऽन्वारभते । एतावान्वै सर्वो यज्ञो—यावन्त एते पञ्चर्त्विजो भवन्ति । पाङ्क्तो वै यज्ञः । तद् यज्ञमेवैतद्यजमानोऽन्वारभते ॥ ४ ॥

द्वितीयं भागं व्याचष्टे—ग्रावच्युत इत्यादि । अभिषवार्थेन ग्रा ( व्णा ) वाऽधिषवणयोरभिषवफलकयोश्च्युतस्ततोऽपि सोमसम्बन्धी द्रप्सोऽशुश्च पतति यतः, अतोऽस्य मन्त्रस्योच्चारणम् ।

तृतीयं भागं व्याचष्टे—अध्वर्योर्वेत्यादि । ' अध्वर्योः ' ' पाणिभ्याम् ' ' पवित्राद्वा ' ' स्कन्दति ' इत्यनेनाभिप्रायेणाध्वर्योर्वेत्यादि प्रयुक्तम् ।

चतुर्थं व्याचष्टे—तं ते जुहोमीत्यादि । अत्र ' वषट्कृतम् ' इत्येतदुच्चारणेन सवषट्कारो होम एव भवतीत्यर्थः । हे सोम ! ग्राव्णश्च्युतः अधिषवणयोरुपस्थाच्च' च्युतः । अध्वर्योर्वा पवित्राद्वा च्युतो 'यस्तेंऽशुर्द्रप्सश्च ' ' ते ' तव सम्बन्धिनं तमंशुं द्रप्सं च मनसा ' वषट्कृतं ' सन्तं जुहोमि ' । इदं द्रव्यं स्वाहुतमस्तु । इति मन्त्रार्थः ॥ २ ॥

वैप्रुषहोमानन्तरं बहिष्पवमानार्थमध्वर्युणा तृणयोरादानं प्रथमं विधत्ते—अथेत्यादि । ( वेदितृणेऽध्वर्युरादत्ते प्रह्वा उदंचो गच्छन्ति । का० श्रौ० सू० ९ । १५४ । ) ' स्तीर्णायै ' इति षष्ठ्यर्थे चतुर्थी (पा. सू. २ । ३ । ६२ । वा. १ ) स्तीर्णायाः ' वेदेः ' सकाशात् ' तृणे ' आददीतेत्यर्थः । बहिष्पवमानायाध्वर्युप्रभृतीनां गमनम्,तेषां ( तच्च ) चानन्तर्यं विधत्ते—तावध्वर्यू प्रथमावित्यादि । ' तौ ' ' यज्ञस्य ' प्राणापानात्मकावध्वर्युप्रतिप्रस्थातारौ ' प्रथमौ ' ' प्रतिपद्येते ' गन्तुमुपक्रामतः । एवमुत्तरत्र वाक्येष्वपि योजना । अथोद्गातेति, यज्ञस्योच्यते । उद्गाता च यज्ञाङ्गत्वात् ' प्रजापतिः ' । स च ' यज्ञस्य ' ' आत्मा ' मध्यशरीरम् । अत्राध्वर्युप्रभृतीनां यज्ञसम्बन्धिप्राणाद्यात्मकत्वकथनेन यज्ञस्य मुख्याङ्गं बहिष्पवमानंप्रति गन्तृत्वे योग्यता प्रदर्शिता ॥ ३ ॥

यजमानेनाध्वर्युप्रभृतीनां स्पर्शनं सोपपत्तिकं विधत्ते—तान्वा एतानित्यादि । ' एते ' ' पञ्चर्त्विजो '

स्वर्णजयन्तीवर्षम् 2019-20

श्रीमद्वाजसनेयिमाध्यन्दिन-

# शतपथ-ब्राह्मणम्

श्रीमत्त्रयीभाष्यकार-सायणाचार्यविरचित-
वेदार्थ-प्रकाशाख्यभाष्यसमेतम्।

तत्र

षष्ठ-सप्तमाष्टम-नवमकाण्डात्मिका: चायनीय।
अग्निचयसंज्ञका।

## तृतीयो भागः

केन्द्रीयसंस्कृतविश्वविद्यालयः
संसदः अधिनियमेन स्थापितः
(प्राक्तन राष्ट्रियसंस्कृतसंस्थानम्, मानितविश्वविद्यालयः)
भारतसर्वकारस्य मानवसंसाधनविकासमन्त्रालयाधीनः

स्वर्णजयन्तीवर्षम् 2019-20

ॐ

श्रीमद्वाजसनेयिमाध्यन्दिन-

# शतपथ-ब्राह्मणम्

श्रीमत्त्रयीभाष्यकार-सायणाचार्यविरचित-
वेदार्थ-प्रकाशाख्यभाष्यसमेतम्।

उपर्युक्तभाष्यानुपलब्धिस्थाने-
सर्वविद्यानिधानकवीन्द्राचार्यसरस्वती-
श्रीहरिस्वामिभाष्यसमेतं च।
बहुभिर्विद्वद्भिः परिशोधितं च।

तत्र

षष्ठ-सप्तमाष्टम-नवमकाण्डात्मकः चायनीयः
षष्टिपथसंज्ञकः

## तृतीयो भागः

केन्द्रीयसंस्कृतविश्वविद्यालयः
संसदः अधिनियमेन स्थापितः
(प्राक्तनं राष्ट्रियसंस्कृतसंस्थानम्, मानितविश्वविद्यालयः)
भारतसर्वकारस्य मानवसंसाधनविकासमन्त्रालयाधीनः

**Published with the Financial Assistance from Central Sanskrit University, Ministry of Human Resource Development, Govt. of India**

Publisher :
**Registrar**
**Central Sanskrit University**
(Formerly Rashtriya Sanskrit Sansthan, Deemed to be University)
56-57, Institutional Area, Janakpuri, New Delhi-110058
EPABX : 28524993, 28521994, 28524995
website : www.sanskrit.nic.in

Reprint - 2002
Reprint - 2020

Price ₹ 2115-00 (Per Set)

Printed by :
**D.V. Printers**
97-U.B., Jawahar Nagar, Delhi-110007

श्रीशःशरणम् ।

# माध्यन्दिनशतपथब्राह्मणगतविषयानुक्रमणिका ।

## षष्ठे उखासम्भरणकाण्डे–

ब्रा० विषयाः — पृष्ठाङ्काः

### अथ प्रथमोऽध्यायः ।

१ **अथाग्निचित्या**–तत्र हिरण्यगर्भकर्तृकसृष्टेराम्नानं, तत्प्रसङ्गात्प्रश्नोत्तराभ्यामृषिशब्दनिर्वचनं मध्यमप्राणस्य सर्वेन्द्रियपोषणद्वारा इन्द्रशब्दवाच्यत्वाभिधानं, ऋषिशरीरशब्दयोर्निर्वचनसमेतं नानापुरुषोत्पत्तिद्वारा सर्वावयवसम्पन्नस्यैकस्य विराडात्मकपुरुषस्योद्भवमभ्याधाय तस्याग्निरूपत्वाभिधानं, विराट्पुरुषस्य चित्याग्नेश्च साम्यत्वोपपादनं, विराडात्मकस्य सप्तपुरुषसम्मितस्य चित्याग्नेः शिरसो दर्शनं, चयनोपयुक्तायाः सृष्टेराम्नानं, तस्यां च त्रयीलक्षणब्रह्मणोऽपामाण्डस्य चोत्पत्तेः कथनम्, आण्डान्मेषाग्न्यश्वरासभाजानां पशूनामुत्पत्तेःकथनं ततः पृथिव्या उत्पत्तिमभिधाय तत्सकाशाच्छुष्कार्द्रमृदादीनां नवानामुत्पत्तेरभिधानं, भूमेरग्नेश्च गायत्रत्वसम्पादनं चेत्यादि. — १–८

२ **वाय्वन्तरिक्षादिसृष्टिः प्रजापतेश्चित्याग्निरूपता च**–तत्र प्रथमं पृथिव्यग्न्योर्मिथुनाद्वायोर्वाय्वन्तरिक्षयोर्मिथुनादादित्यस्यादित्यद्युलोकयोर्मिथुनाच्चन्द्रमोनक्षत्रावान्तरदिङ्महादिशां वाङ्मनसयोर्मिथुनाद्वसुरुद्रादित्यविश्वेदेवानां चोत्पत्तेरभिधानं, केषाञ्चिन्मतेनवसुरुद्रादित्यविश्वेदेवानामुत्पत्तेरग्निपूर्वकत्वप्रदर्शनम्, अपरमतेन प्रजापतेरेव सर्वसृष्टेरभिधानम्-अत्रार्थे श्रुतिसम्मतेः प्रदर्शनं च, सर्वोत्पादकस्य प्रजापतेश्चित्याग्निरूपताया आख्यायिकया प्रदर्शनं,तस्यां च सफलं सकारणं प्रश्नोत्तररूपेण सन्धानप्रकारनिरूपणं, प्रसङ्गाद्धितोपहितशब्दयोरर्थप्रदर्शनं चितिसंख्याप्रदर्शनपुरःसरं सार्थवादं प्रजापतेश्चित्यत्वप्रदर्शनं, चित्योपरि निधीयमानस्याहवनीयस्याग्नेरादित्यरूपत्वाभिधानं, प्रजापतेर्देवैः सन्धानप्रकारकथनं भैषज्यकरणप्रकारकथनं च, इष्टकाशब्दस्य निर्वचनम्, अक्ताक्ष्यमतेन यजुष्मतीष्टका भूयस्त्वेनोपधेयास्ताण्ड्यमतेन लोकम्पृणेष्टका भूयस्त्वेनोपधेया इति सोपपत्तिकं मतद्वयमभिधाय तद्दूषयित्वा च वास्तविकोऽनुष्ठानप्रकारस्तूभयविलक्षणोऽस्तीति निरूपणं, प्रजापतेरग्निना देवैश्च सन्धाने कृते सम्पद्यमानमर्थं प्रदर्श्य तद्वेदितुः फलकथनं, प्रागुक्तस्य प्राणे वाचो निधानरूपस्यार्थस्यात्रेष्टकोपनिधानमन्त्रे प्रदर्शनं, वाक्प्राणयोरग्नीन्द्रत्वरूपेण प्रशंसनं, चित्याग्नेरिन्द्राग्निदेवत्यत्वप्रख्यापनायेन्द्राग्न्योः सर्वदेवतात्मना प्रशंसनं, भूमावेवेष्टकाचयनं कर्तव्यमित्यस्य प्रश्नोत्तराभ्यामुपपादनम्, इष्टकायाश्चतुःस्रक्तित्वरूपगुणस्याभिधानं,पञ्चेष्टकानां प्रश्नोत्तरपूर्वकमुपपादनं, सोपपत्तिकपूर्वोत्तरपक्षाभ्यां चितानामिष्टका-

ब्रा० विषयाः पृष्ठाङ्काः | ब्रा० विषयाः पृष्ठाङ्काः

नामाहवनीयाग्निरेव शिर इति सिद्धान्तस्थापनं, चयने पशुशीर्षोपधानात्पश्चिष्टकेत्युक्तम्, तत्र पशूनां संख्याप्रतिवचनव्याजेनेष्टकानां लोकद्वयात्मकत्वनिरूपणं, मृत्तिकोदकसम्पादनीयानामिष्टकानां पशु रूपत्वस्य प्रश्नोत्तराभ्यां प्रदर्शनं. पशुद्वित्वप्रतिवचनेन लोकद्वयात्मकेष्टकाचितस्याग्नेः सर्वलोकात्मकत्वनिरूपणम्, अग्निचयनस्य स्वर्गप्रापणरूपं फलं केषाञ्चिन्मतेन पूर्वपक्षयित्वा तद्दूषयित्वा च सिद्धान्ते प्रजापतिभवनरूपमेव फलमिति निरूपणं चेत्यादि. ८–२१

३ सोपपत्तिकं चयनोपयुक्तानामप्फेनमृत्सिकताशर्कराऽश्मायोहिरण्यानामष्टानां रूपाणामुत्पत्त्यभिधानं, भूमेर्गायत्रीत्वोपपादनं, भूमेः पृथिवीशब्दवाच्यत्वे प्रवृत्तिनिमित्तकथनं, कुमारोत्पत्तेः सविशेषं निरूपणं, भूतादिशब्दानामर्थकथनम्, उत्पन्नस्य कुमारस्याष्टानां पृथिव्यप्तेजोवाय्वाकाशसूर्यचन्द्रयजमानाख्यानां रूपाणां रुद्रशर्वपशुपत्युग्राशनिभवमहादेवेशानानां नाम्नां च सोपपत्तिकं सार्थवादं निरूपणं, "कुमारः" इति नवमं नामेत्यभिधानम्, उक्ताया नवसंख्यायास्त्रिवृदात्मना प्रशंसनं, नामगताष्टसंख्याया गायत्र्यात्मना प्रशंसनं, संवत्सरान्ते संवत्सरद्वयान्ते वा चयनानुष्ठानमनुवचनं च कर्तव्यमिति पक्षद्वयं प्रतिपाद्य तत्र द्वितीये पक्षे उपपत्तिं च प्रदर्श्य सिद्धान्ततया प्रथमपक्षस्यैव सहेतुकं निगमनं, चितस्याग्नेश्चित्रत्वोपपादनसहितं चयनसम्बन्धाच्चित्रनाम सम्पन्नमिति निरूपणं चेत्यादि. २२–२९

इति प्रथमोऽध्यायः ।

## अथ द्वितीयोऽध्यायः ।

१ आदौ पञ्चपश्वालम्भपक्षं विधातुं प्रजापतिवृत्तान्तकथनं, पश्यतियोगात्पशुशब्दः सम्पन्न इति प्रदर्शनं, पशूनामग्न्यात्मकत्वप्रदर्शनं, तेषां बहुदेवतार्थमालम्भनमिति पूर्वपक्षयित्वाऽग्निभ्यः कामाय पशवे इति सिद्धान्तप्रतिष्ठापनं, पशुशीर्षोपधानं विधातुं प्रजापतिकर्तृकस्य तदुपधानस्य निरूपणम्, अजेतरपशुशरीराणामप्सु प्रप्लावनमभिधायाजेन पशुना सकारणं सोपपत्तिकं यज्ञसमापनविधानम्, अप्सु पशुचतुष्टयकायप्रासनस्य प्रयोजनकथनम्, अग्निपका इष्टकाश्चेतव्या इति प्रतिपादनम्, इष्टकाकरणकालस्य कथनं, पशुशीर्षोपधानानन्तरमिष्टकोपधानं पशुशिरः–कबन्धसन्धानरूपेण प्रशंस्य प्रागुक्तस्य पशूनामग्न्यात्मकत्वस्य प्रशंसनम्, एकेषां मतेनालब्धैः सर्वैः पशुभिर्यागकरणमुक्त्वाऽपरमतेन तत्सकारणं दूषयित्वा पञ्चानामपि पशूनामालम्भस्तत्रैकेनाजेन पशुना याग इति प्रागुक्तः पक्षोऽर्थसिद्धो भवतीति निरूपणं, पश्वालम्भनस्यायतनकरणात्मना प्रशंसनं, पशूनामनुक्रमणं, पशुगतपञ्चसंख्यायाः प्रशंसनं, पशूनामालम्भनक्रमविधानम्, पशूनां बन्धनार्थाया रशनायाः सविशेषं सोपपत्तिकं पक्षद्वयात्मकं विधानं, प्रश्नपूर्वकं पशुष्वेव पञ्चेष्टकानां सम्पादनं, सार्थवादं सामिधेनीनां चतुर्विंशतिसंख्याकत्वप्रतिपादनं, सामिधेनीगतचतुर्विंशतिसंख्यायाः प्रकारान्तरेण प्रशंसनं, सामिधेनीगतगायत्री-



ब्रा० विषयाः पृष्ठाङ्काः | ब्रा० विषयाः पृष्ठाङ्काः

त्रिष्टुप्छन्दसां प्राणात्मसमिन्धनरूपेण प्रशंसनं, मध्ये निधीयमानानामृचामनुवाचनं विधाय तासां प्रजापतिसमिन्धनार्थत्वमग्निदृष्टत्वं च दर्शयित्वा तत्राद्यायां ऋचः प्रतिपादमनूद्य व्याख्यानं, नवानामप्यृचामेकाभिधेयतां प्रदर्श्याग्न्यार्षेयत्वप्रजापतिदेवत्वयोः प्रदर्शनं, द्वादशाप्रियसंज्ञकाः प्रयाजयाज्या विधाय तासां संवत्सरात्मना प्रशंसनं, द्वादशसंख्यायाः सर्वच्छन्दोरूपद्वादशाक्षरजगत्यात्मना प्रशंसनम्, एतासामाप्रीसंज्ञकानामृचां प्रजापतेराप्रीणनार्थत्वाग्निदृष्टत्वे प्रदर्श्य तत्राद्याया ऋचः प्रतिपादमनूद्य व्याख्यानम्, एतासां द्वादशाप्रीसंज्ञकानामृचामेकाभिधेयत्वं प्रतिपाद्य पूर्ववदग्निप्रजापतिसम्बन्धप्रदर्शनं, विहितानां प्रयाजयाज्यामंत्राणां पादाक्षरच्छन्दोभिर्नैषम्यमुक्त्वा तद्द्वारा निषमाणां प्राजापत्यङ्गानामाप्रीणनाभिधानं, प्रागुक्तान्पुरुषादीन्पञ्चपशूननुलक्ष्य निर्वापणीयस्य विश्वानरदेवत्यपशुपुरोडाशस्य विधानं, सर्वासां चितीनामृत्वात्मकत्वोक्तेरग्नीनामृतुत्वमुक्तं भवत्येवेत्यभिधाय वैश्वानरायेत्यत्र केषाञ्चिन्मतेनाग्नय इति गुणपदमाशंक्य तद्दूषयित्वा वैश्वानरपुरोडाशस्य द्वादशकपालवत्त्वस्य वपापुरोडाशहविषामग्निदेवत्यानां कामपदयुक्तानां याज्याऽनुवाक्यानां च विधानं, पशुशीर्षोपधाने आलभ्य प्रागुक्तपुरुषादिपञ्चपशुशिरसां निधानं हिरण्मयशीर्षोपधान मृण्मयशीर्षोपधानं चेति पक्षत्रयं प्रतिपाद्य तत्र प्रथमपक्षं कुणपमर्त्यत्वदोषाभ्यां सदृष्टान्तं दूषयित्वा द्वितीयं तृतीयं च पक्षं साक्षात्पशुशीर्षत्वाभावदोषेण दूषयित्वा पुनः प्रथमस्य पञ्चपश्वालम्भपक्षस्यैव सिद्धान्ततयाऽनुष्ठातृसम्प्रदायप्रामाण्यावष्टम्भेन प्रतिष्ठापनं, एतावत्पर्यन्तं पञ्चपश्वालम्भपक्षमुक्त्वाऽधुना प्राजापत्यवायव्यपश्वोर्द्वयोरालम्भनपक्ष उच्यत इति प्रतिपादनं चेत्यादि. ३०–४७

२ प्राजापत्यपश्वनुष्ठाने सफलं चरकाध्वर्यूणां सम्प्रदायस्य प्रदर्शनं, तस्य पशोः सोपपत्तिकं श्यामत्वतूपरत्वादिगुणविधानं प्राजापत्यपशुपक्षे सामिधेनीषु समिध्यमानसमिद्धवत्योर्ऋचोर्मध्ये षड्धाय्या निदध्यादिति विधानं, प्राकृता निविष्टाश्चोभयीर्मिलित्वैकविंशतिसामिधेन्य इति दर्शयित्वाऽस्या एकविंशतिसंख्यायाः पूर्ववत्प्रकारद्वयेन प्रशंसनं, सामिधेनीष्वादौ भूयस्यो गायत्र्यो मध्ये त्रिष्टुभोऽन्ते पुनर्गायत्र्यः प्रजापतिसंधानार्थास्तासां विधायकस्य ब्राह्मणस्यातिदेशः, पूर्वाघारो हिरण्यगर्भवत्यर्चा कर्तव्यो देवतासामान्यादिति सोपपत्तिकं पूर्वपक्षयित्वा सिद्धान्ते तूत्तराघार एव हिरण्यगर्भवत्यर्चा कर्तव्यो मंत्रवत्त्वसामान्यादिति निगमनम्, आप्रीणामृचां संख्यायाः स्तावकब्राह्मणस्य प्रजापतिसंस्कारसन्धानजननलक्षणैकार्थव्याख्यानब्राह्मणस्य प्राजापत्यपशुपुरोडाशब्राह्मणस्य चातिदेशः, कद्वतीनामृचां प्रजापतिदेवत्यत्वप्रदर्शनं, वायव्यपशुपक्षविधानं तत्र सोपपत्तिकं वायोर्नियुत्वद्गुणकत्वस्य पशोः शुक्लत्वतूपरत्वादिगुणकत्वस्य च प्रदर्शनं, अस्य वायव्यपशोः सप्तदश सामिधेनीरभिधाय तद्गत-

(स्तु)तदु ह चरकाध्वर्यवः । (वोऽन्या) अन्या ऽएवापानभृतो व्यानभृत ऽउदानभृतः समानभृतश्चक्षुर्भृतो मनोभृतः श्रोत्रभृतो वाग्भृत ऽइत्युपदधति न तथा कुर्यादत्यहैव रेचयन्त्यत्रोऽएवैतानि सर्वाणि रूपाण्युपधीयन्ते ७

स वै पुरस्तादुपधाय पश्चादुपदधाति । प्राणो ह्यपानो भूत्वाऽऽङ्गुल्यग्रेभ्य ऽइति संचरत्यपान ऽउ ह प्राणो भूत्वाऽऽङ्गुल्यग्रेभ्य ऽइति संचरति तद्यत्पुरस्तादुपधाय पश्चादुपदधात्येतावेवैतत्प्राणौ संतनोति संदधाति तस्मादेतौ प्राणौ संततौ सꣳहितौ ॥ ८ ॥

(तावु) अथ दक्षिणत ऽउपधायोत्तरत ऽउपदधाति । व्यानो ह्युदानो भूत्वाऽऽङ्गुल्यग्रेभ्य ऽइति संचरत्युदान ऽउ ह व्यानो भूत्वाऽऽङ्गुल्यग्रेभ्य

---

तदु ह चरकाध्वर्यवः—अन्या एवापानभृतो व्यानभृत उदानभृतः समानभृतः, चक्षुर्भृतो मनोभृतः श्रोत्रभृतो वाग्भृत—इत्युपदधति । न तथा कुर्यात् । अत्यहैव रेचयन्ति । अत्रोऽएवैतानि सर्वाणि रूपाण्युपधीयन्ते ॥ ७ ॥

स वै पुरस्तादुपधाय पश्चादुपदधाति । प्राणो ह्यपानो भूत्वाऽऽङ्गुल्यग्रेभ्य इति सञ्चरति । अपान उ ह प्राणो भूत्वाऽऽङ्गुल्यग्रेभ्य इति सञ्चरति । तद्यत्पुरस्तादुपधाय पश्चादुपदधाति । एतावेवैतत्प्राणौ सन्तनोति, सन्दधाति । तस्मादेतौ प्राणौ सन्ततौ संहितौ ॥ ८ ॥

अथ दक्षिणत उपधायोत्तरत उपदधाति । व्यानो ह्युदानो भूत्वाऽऽङ्गुल्यग्रेभ्य इति संचरति ।

---

अन्यदीयं मतमुपन्यस्य निराचष्टे—तदु ह चरकाध्वर्यव इति । चरकप्रोक्तशाखाध्यायिनोऽर्ध्वर्यवः 'चरकाध्वर्यवः' 'तत्' तत्र उक्तविषये प्राणभृद्द्वयोऽन्या एवापानभृदादीष्टकाः 'उपदधति' इति तन्मतोपन्यासः । तदेतन्निषेधति—न तथा कुर्यादिति । 'अत्रो' 'एव' अत्रैव प्राणभृत्स्वेवोदीरितरीत्या 'एतानि सर्वाणि' अपानभृच्चक्षुर्भृदेवमादीनि 'रूपाण्युपधीयन्ते' पृथगुपदधतां तेषामतिरेकदोष एव स्यादित्यर्थः ॥ ७ ॥

पूर्वदिशि प्राणभृतामुपधानानन्तरं दक्षिणां दिशं विहाय प्रतीच्यां दिशि कर्तव्यमिति विधत्ते—स वै पुरस्तादिति । एतदुपपादयति—प्राणो हेति । मुखनासिकाभ्यां बहिर्निःसरञ्छरीरस्य पूर्वभागेऽवस्थितः प्राणवायुः पुनर्मुखनासाभ्यामेवान्तःप्रविशन्नपानवृत्त्यात्मकः 'भूत्वा' 'आङ्गुल्यग्रेभ्यः' नखाग्रपर्यन्तम् 'इति'—शब्दोऽभिनयद्योतकः । अनेन प्रकारेण देहमध्ये प्रत्यङ्मुखः 'सञ्चरति' । अधोमुखः स एव 'अपानः' पुनरूर्ध्वमुखः 'प्राणो भूत्वा' नखाग्रपर्यन्तम् 'इति' अनेन प्रकारेण प्राचीनं 'सञ्चरति' अतः पूर्वापरदिशोर्नैरन्तर्येण प्राणभृदुपधानाद् 'एतावेव' प्राणापानौ परस्परं सम्बद्धौ 'संहितौ' अविच्छिन्नौ च भवत इत्यर्थः । यस्मादेवमेतस्मिन्कर्मणि 'तस्माद्' एव कारणाल्लोकेऽप्येवं प्राणापानौ दृश्येते इत्यर्थः ॥ ८ ॥

अथ दक्षिणोत्तरदिशोरपि नैरन्तर्येण प्राणभृदुपधानं विधाय स्तौति—अथ दक्षिणत इति । 'अथ'—शब्दः प्रत्यग्दिगुपधानानन्तर्यार्थः । दक्षिणत उपहिताः प्राणभृत एव मनोभृतः व्यानभृतश्च, उत्तरत उप-





ऽइति संचरति तद्यद्दक्षिणत ऽउपधायोत्तरत ऽउपदधात्येतावेवैतत्प्राणौ संतनोति संदधाति तस्मादेतौ प्राणौ संततौ सꣳहितौ ॥ ९ ॥

(तावु) अथ या मध्य ऽउपदधाति । स प्राणस्ता रेतःसिचोर्वेलयोपदधाति पृष्टयो वै रेतःसिचौ मध्यमु पृष्टयो मध्यत ऽएवास्मिन्नेतत्प्राणं दधाति सर्वत ऽउपदधाति सर्वत ऽएवास्मिन्नेतत्प्राणं दधात्यथो ऽएवꣳ हैष गुदः प्राणः समन्तं नाभिं पर्यक्नोऽनूचीश्च तिरश्चीश्चोपदधाति तस्मादिमेऽन्वञ्चश्च तिर्यञ्चश्चात्मन्प्राणाः सꣳस्पृष्टा ऽउपदधाति प्राणानेवैतत्संतनोति संदधाति तस्मादिमे प्राणाः संतताः सꣳहिताः ॥ १० ॥

इति प्रथमप्रपाठके तृतीयं ब्राह्मणम् ॥ ८-१-३ ॥ ( १. ३. ) ॥

---

उदान उ ह व्यानो भूत्वाऽऽङ्गुल्यग्रेभ्य इति सञ्चरति । तद्यद्दक्षिणत उपधायोत्तरत उपदधाति । एतावेवैतत्प्राणौ सन्तनोति, सन्दधाति । तस्मादेतौ प्राणौ सन्ततौ, संहितौ ॥ ९ ॥

अथ या मध्यऽउपदधाति—स प्राणः । ता रेतःसिचोर्वेलयोपदधाति । पृष्टयो वै रेतःसिचौ । मध्यमु पृष्टयः, मध्यत एवास्मिन्नेतत्प्राणं दधाति । सर्वत उपदधाति । सर्वत एवास्मिन्नेतत्प्राणं दधाति । अथोऽएवं हैष गुदः प्राणः समन्तं नाभिं पर्यक्नः । अनूचीश्च तिरश्चीश्चोपदधाति । तस्मादिमेऽन्वञ्चश्च तिर्यञ्चश्चात्मन्प्राणाः । संस्पृष्टा उपदधाति । प्राणानेवैतत्सन्तनोति, सन्दधाति । तस्मादिमे प्राणाः सन्तताः संहिताः ॥ १० ॥

---

हिताः श्रोत्रभृत उदानभृतश्च । 'तत्' तथा च 'दक्षिणत उपधायोत्तरतः' उपधाने व्यानोदानयोः पूर्ववत्परस्पराभिमुख्येन संचरणम्, तद्धेतुकाविच्छेदश्च सिद्ध्यतीति 'व्यानो ह्युदानो भूत्वा' इत्यादेस्तात्पर्यार्थः । गतमन्यत् ॥ ९ ॥

अथ मध्यत उपधेयानां स्थानविशेषं विधाय स्तौति—अथ या मध्य इति ! 'मध्ये' 'याः' दशसङ्ख्याकाः प्राणभृत उपधीयन्ते 'स प्राणः' समानवृत्त्युपेतप्राणात्मिकास्ता इत्यर्थः । 'स' इति विधेयापेक्षयैकवचनम् । रेतःसिगाख्ययोरिष्टकयोर्या वेला प्रान्तदेशस्तया 'वेलया' 'ताः' उपदध्यात्, ताः मध्यवर्तिनीः प्राणभृत इत्यर्थः । पृष्टयो वा इत्यादि । कटिसम्बन्धीन्यस्थीनि 'पृष्टयः' तदात्मिके हि रेतःसिगाख्ये इष्टके । ताश्च पृष्टयो 'मध्यमु' पुरुषशरीरस्य मध्यभाग एव तथा च 'एतत्' एतेन मध्यवर्तिपृष्टिरूपरेतःसिक्समीपे प्राणभृदुपधानेन 'मध्यतः' चित्याग्निशरीरस्य मध्य एव पञ्चमवृत्त्यात्मकम् 'प्राणम्' प्रतिष्ठापयति । सर्वत उपधानमनूद्य स्तौति—सर्वत उपदधातीति । सर्वत एवास्मिन्निति । 'सर्वतः' सर्वाभ्यो दिग्भ्यः । सर्वत उपधानं प्रकारान्तरेण स्तौति—अथो एवं हैष इति । 'अथो' अपि च 'एवमेषः' खल्वेषः 'गुदः प्राणः' प्राणोत्पत्तिस्थानस्य मूलाधाराख्यस्योपलक्षणमेतत्; तथाविधः सः 'समन्तं नाभिम्' नाभेः सर्वतः 'पर्यक्नः' परिणतः "अञ्चु गतौ"—( धा. पा. भ्वा. प. १८८ ) इत्यस्मान्निष्ठायाम् "अञ्चोऽनपादाने"—( पा. सू. ८ । २ । ४८ ) इति नत्वम् । अथ सर्वासां प्राणभृतामुपधाने धर्मविशेषं

स्वर्णजयन्तीवर्षम् 2019-20

श्रीमद्वाजसनेयिमाध्यन्दिन-

# शतपथ-ब्राह्मणम्

श्रीमत्त्रयीभाष्यकार-सायणाचार्यविरचित-
वेदार्थ-प्रकाशाख्यभाष्यसमेतम्।

तत्र

दशमैकादश-द्वादश-त्रयोदश-चतुर्दश [illegible]
[illegible]
[illegible]

चतुर्थो भागः

केन्द्रीयसंस्कृतविश्वविद्यालयः
संसदः अधिनियमेन स्थापितः
(प्राक्तनं राष्ट्रियसंस्कृतसंस्थानम्, मानितविश्वविद्यालयः)
भारतसर्वकारस्य मानवसंसाधनविकासमन्त्रालयाधीनः

स्वर्णजयन्तीवर्षम् 2019-20

ॐ

श्रीमद्वाजसनेयिमाध्यन्दिन-

# शतपथ-ब्राह्मणम्

श्रीमत्त्रयीभाष्यकार-सायणाचार्यविरचित-
वेदार्थ-प्रकाशाख्यभाष्यसमेतम्।

उपर्युक्तभाष्यानुपलब्धिस्थाने-
सर्वविद्यानिधानकवीन्द्राचार्यसरस्वती-
श्रीहरिस्वामिभाष्यसमेतं च।
बहुभिर्विद्वद्भिः परिशोधितं च।

तत्र

दशमैकादश-द्वादश-त्रयोदश-चतुर्दशाद्यप्रवर्ग्य-काण्डात्मकः द्वादश-
काण्डीयषष्ठाध्यायान्तोऽशीतिपथ-संज्ञकस्तदुत्तरं परिशेष-
संज्ञकश्च, उत्तरक्रतुसौत्रामण्यश्वमेधादिनिरूपकः

## चतुर्थो भागः


केन्द्रीयसंस्कृतविश्वविद्यालयः
संसदः अधिनियमेन स्थापितः
(प्राक्तनं राष्ट्रियसंस्कृतसंस्थानम्, मानितविश्वविद्यालयः)
भारतसर्वकारस्य मानवसंसाधनविकासमन्त्रालयाधीनः

Published with the Financial Assistance from Central Sanskrit University,
Ministry of Human Resource Development, Govt. of India

Publisher :
**Registrar**
**Central Sanskrit University**
(Formerly Rashtriya Sanskrit Sansthan, Deemed to be University)
56-57, Institutional Area, Janakpuri, New Delhi-110058
EPABX : 28524993, 28521994, 28524995
website : www.sanskrit.nic.in

Reprint - 2002
Reprint - 2020

Price ₹ 2115-00 (Per Set)

Printed by :
**D.V. Printers**
97-U.B., Jawahar Nagar, Delhi-110007

श्रीशः शरणम् ।

# अथाग्निरहस्यनामके दशमे काण्डे

## विषयानुक्रमणिका प्रारभ्यते ।

ब्रा० विषयाः पृष्ठाङ्काः

### तत्र प्रथमोऽध्यायः ।

१ – अग्निचयनमहाव्रतसामबृहदुक्थानां नियमेन सहप्रयोज्यत्वात्तानि त्रीण्येवं सहभावनीयानीति वक्तुं प्रथममग्निबृहदुक्थयोरनुवदनं, संवत्सरात्मकाग्नेः पूर्वं चयनं बृहदुक्थस्यान्ते शंसनमिति यदुक्तं तस्य प्रशंसनं, सोपपत्तिकं प्रजापतेः संवत्सररूपत्वाभिधानं, चीयमानाग्नेः संवत्सरप्रजापत्युभयरूपत्वस्याभिधानं, तत्र यावत्य इष्टका यजुर्मन्त्रैरुपहितास्तावत्य एव प्रजापत्यवयवात्मना प्रतिसंहिता इत्यपि प्रतिपादनं, एवं चित्यमग्निं प्रशस्य स्तोत्रशस्त्रयोः प्रशंसनं, तत्र पूर्वभाविग्रहग्रहणं प्रशंसितुं ग्रहे सिच्यमानचमसस्य प्रशंसनं, अध्वर्युकर्तृकं रसग्रहणमभिधाय तस्य महाव्रतमहदुक्थत्वयोरुपपादनं, पूर्वं प्रजापते रससंयुक्तता स्यादन्यथा रसाभावेन शरीरमदृढं भवेदित्याशंक्य तस्याः शंकाया रसस्थापनेन व्युदसनं, अग्नौ रसस्याप्ययनस्य प्रशंसनं, चित्याग्नेर्मिथुनरूपेण प्रशंसनं, उक्ताया मिथुनत्वसम्पत्तेः स्त्रीपुंसयोः शरीरे प्रदर्शनं, एवं मिथुनरूपेणाप्ययनप्रकारं प्रदर्श्य पुनश्चित्याग्निं मिथुनरूपेण स्तोतुं प्रकारान्तरेण प्रतिज्ञापूर्वकं मिथुनत्वस्य प्रतिपादनं, मिथुनपरम्पराऽऽवेदितुः फलनिरूपणं, उक्तेऽर्थे मन्त्रसंवादप्रदर्शनं, यदंर्थमन्त्ररूपत्वमुक्तं तस्य प्रदर्शनं, " अन्नस्यामृतभागो वायुमप्येति " इति यदुक्तं तस्य प्रकृते योजनं, चेत्यादि. १–७

२–पूर्वं महाव्रतयज्ञे सहप्रयुक्तानि अग्निचयनमहाव्रतसामबृहदुक्थशस्त्राणि त्रीण्यपि पक्ष्याकाराण्यधिदैवं पृथिव्यन्तरिक्षद्युलोकात्मकानि–अध्यात्मं मनः–प्राणवाग्रूपाणि चेत्यादिनिरूपणं ज्योतिष्टोमे एवैतेषां त्रयाणां सम्पादनप्रकारोपवर्णनं, तत्रोक्तानां भूम्यादिलोकानामग्न्यादेश्चाभेदविवक्षया तदात्मकताप्रतिपादनं, एतेषामेव त्रयाणामध्यात्मत्वं प्रदर्श्य प्रकारान्तरेण प्रशंसनं, पुनः प्रकारान्तरेणैतेषां त्रयाणां प्रशंसनं, प्रथमसंस्थारूपज्योतिष्टोमाग्निष्टोमं महाव्रतयज्ञात्मना स्तोतुं तत्रैवाग्निचयनादित्रयस्योपात्तेर्ब्रह्मवादिप्रश्नोत्तराभ्यां प्रदर्शनं चेत्यादि. ७–११

३–प्रजापतेः प्राणेभ्यः सृष्टिनिर्माणकरणप्रतिपादनं, प्रजाः सृष्टवतः प्रजापतेः शरीरस्य मर्त्यामृतत्वं प्रतिपाद्य तत्र मर्त्यशरीरद्वारा मृत्योर्भयेन मृज्जलरूपेण भूमौ प्रवेशननिरूपणं, भूप्रवेशस्यैव मृत्युदेवप्रश्नप्रतिवचनाभ्यां निरूपणं, अऽग्निचयने पञ्चेष्टकाचितयः पञ्चपुरीषचितयश्च ताः प्रजापतेर्मर्त्यामृतशरीराणीति प्रतिपादनं, उभय्यः पञ्चापि तन्वश्चित्याग्नेरेवेति वक्तुं प्रजापतेस्तदात्मकत्वप्रतिपादनं,

ब्रा० विषयाः पृष्ठाङ्काः

मर्त्यशरीराणाममृतत्वकरणप्रदर्शनं, अमृतशरीरद्वयेनैकस्य मर्त्यशरीरस्यामृतीकरणस्य चित्याग्नौ प्रदर्शनं, यदि द्वाभ्यामेकस्यामृतीकरणं चेत्पञ्चभ्याः पुरीषचितेरुपरि चित्यन्तराभावात्तस्या अमृतत्वं न स्यादित्याशंक्य सर्वासामुपरि विकर्णीस्वयमातृण्णे इष्टके उपधाय हिरण्यशकलैः सम्प्रोक्ष्य तत्राहवनीयाग्नेराधानमित्येवं रूपां सप्तमीं चितिं संपाद्य ततः पञ्चमीसप्तमीभ्यामिष्टकाचितिभ्यां तन्मध्यस्थितायाः पुरीषचितेरमृतीकरणं सम्पद्यत इति समाधानकथनं, यजमानस्यापि स्वस्यामृतीभवनरूपं फलं सम्पद्यत इति प्रतिपादनं, चित्याग्नेर्न्यूनातिरेकपरिहाराय मन्त्रेणोपस्थानं देवाः कृतवन्त इत्ययमर्थः श्रुत्या स्वयमेव देवकर्तृकाज्ञानपुरःसरं निरूप्यत इत्यभिधानं, मन्त्रगताग्नीन्द्रविश्वदेवपदैः प्रतिपाद्याभिः सवनदेवताभिः सवनत्रयव्यापिचित्याग्नेः संस्कृतत्वस्याभिधानं, अनया ऋचोपस्थाने पूर्वोक्तासर्वकरणादि दोषपरिहारो भवतीति कथनं, ऋग्गतस्यानुष्टुप्छन्दसो वाग्रूपेण प्रशंसनं, उपस्थानकालमभिधाय तत्साधनभूतस्य मन्त्रस्य सार्थवादं साभिप्रायं व्याख्यापकब्राह्मणातिदेशसहितं प्रदर्शनं चेत्यादि. १२-१६

४ अनन्तरातीतब्राह्मणे यत्प्रजापतेर्मर्त्यामृतभेदेन द्वैविध्यमुक्तं तद्द्वयोर्मर्त्यामृतयोरर्थं वक्तुं तत्स्मारणं, षण्णामिष्टकाचितीनां प्रजापतेरमृतशरीरगतप्राणापानव्यानोदानसमानवाग्रूपत्वस्य षण्णां पुरीषचितीनां प्रजापतेर्मर्त्यशरीरगतमज्जास्थिस्नायुवसामांसमेदोऽसृक्त्वग्रूपत्वस्य च प्रतिपादनं, चितिद्वयगतां संख्यामनूद्य सम्भूय तस्याः संवत्सररूपाग्न्यात्मना प्रशंसनं, विकर्ण्यादीष्टकाहिरण्यशकलाहवनीयनिधानस्य हिरण्मयरूपत्वेन प्रशंसनं, हिरण्यशकलाहवनीयनिधानं प्रजापतेर्हिरण्मयरूपमित्युक्तं तत्र गुरुशिष्ययोः संवादेन विवादं प्रदर्श्य तत्र विवादे आचार्यः शाण्डिल्यो रूपमित्येव सोपपत्तिकं निश्चितवानित्याद्यभिधानं, शाण्डिल्येनोक्तेऽर्थे श्रुतेरनुमोदनप्रदर्शनं, चित्याग्निमभिलक्ष्याहवनीयाग्नेः प्राङ्मुखत्वेन प्रणयनस्य प्रशंसनं, प्रणीतेऽग्नौ हूयमानानां समिधां देवानामन्नरूपत्वेन प्रशंसनं, अग्निचितः पक्षिभक्षणवर्जननियमं सहेतुकमनूद्य तस्य सहेतुकमेव दूषणकथनं, अग्निचयनसाध्यस्य फलस्य वेदनादिप्रश्नोत्तराभ्यां निरूपणं, उक्तार्थज्ञस्य फलाभिधानं चेत्यादि. १७-२२

५ अग्निचयनकर्मणः संक्षेपत अग्न्याधानादिसर्वयज्ञात्मकत्वप्रतिपादनं, उक्तयज्ञवीर्याणां मीमांसाकरणं, तत्र शतशब्दस्यापरिमितार्थत्वप्रतिपादनं, उक्तार्थवेदितुः फलनिरूपणं चेति. २३-२६

इति प्रथमोऽध्यायः ।

## अथ द्वितीयोऽध्यायः ।

१ **चित्याग्निविषयकविचारः**—तत्र प्रथमं चित्याग्नेः पक्षिरूपत्वस्य पक्षपुच्छयोः प्रमाणस्य च विधानं, तत्र चित्याग्नेरङ्गुलिपरिमाणस्य सार्थवादं प्रदर्शनं, सप्तपुरुषाष्टपुरुषादिपरिमाणानामग्नीना



ब्रा० विषयाः पृष्ठाङ्काः

मङ्गुलीभिः परिमाणं न शक्यमित्यरत्निपरिमाणस्य विधानं, अङ्गुलिगतायाः संख्यायाः प्रशंसनं, पक्षपुच्छकरणे कस्यचिद्विशेषस्य विधानं, पक्षयोर्निर्णमनं विधाय तत्र प्रदेशं चाभिधाय निर्णमनकरणप्रकारस्य निरूपणं, निर्णामेष्टकोपधानं विधाय तस्य पक्षिपक्षमध्यगतनाडीत्वेन प्रशंसनं, पक्षयोर्वक्रत्वनिरूपणं, पञ्चेष्टकाचित्युपधानानन्तरमात्ममध्ये पक्षद्वये च ऋज्वालिखितदक्षिणावृत्सव्यावृतः सहस्रत्रयसंख्याका इष्टका उपधेयाः सन्ति तासामुपधानस्य प्रशंसनं, तासामुपधाने कालप्रदेशयोः प्रदर्शनं, त्रिविधेष्टकागतां त्रित्वसंख्यामनूद्य तस्याः प्रशंसनं चेत्यादि. २७-३१

२ चित्याग्नेः सप्तपुरुषप्रमाणताया विधानं, अत्रार्थे मन्त्रसंवादप्रदर्शनं, यज्ञार्हस्य यज्ञेन यजनकरणे मन्त्रसंवादप्रदर्शनं, उक्तं मंत्रं प्रतिपदमनूद्य तस्य व्याख्यानं, सृष्ट्यादौ प्रजापतिव्यतिरिक्तस्य यष्टव्यदेवजातस्य विरहात्सूर्य एव पक्ष्यात्मकप्रजापतिरूपेण यष्टव्य इत्यमुमर्थं प्रतिपादयितुं तात्पर्योपेतं मंत्रान्तरप्रदर्शनं, तस्य चित्याग्नेः सप्तपुरुषात्मकत्वाभिधानं समस्थितेन प्रपदोच्छ्रितेन वा यजमानेनोर्ध्वबाहुना चित्याग्नेर्मानं कुर्यादिति सार्थवादं पुरुषप्रमाणविधानं, पक्षौ अरत्नी च प्रशस्य पुच्छे वितस्तिप्रमाणोपधानविधानमर्थादवशिष्टस्याधिकस्यार्धपुरुषप्रमाणस्य विधानं, पुच्छे पक्षप्रमाणान्न्यूनप्रमाणकरणस्य प्रतिष्ठाहेतुत्वेन प्रशंसनं, अरत्निवितस्तिप्रमाणं सम्भूय तत्प्रशंसनं चेत्यादि. ३२-३९

३ **प्राकृतस्य सप्तविधस्याग्नेर्वैकृतेष्वन्त्यस्यैकशतविधस्याग्नेश्च वेदिमानम्**—तत्र महावेदेर्मानं विधातुं प्राचीनवंशगतवेदेर्मानस्य सेतिकर्तव्यताकस्य विधानं, पूर्वं गार्हपत्यादारभ्य प्राञ्चः सप्त प्रक्रमा गार्हपत्याद्भविष्यत आहवनीयस्य पूर्वार्धात्प्राञ्चस्त्रयः प्रक्रमास्ते दश व्याम एकादशस्तामेकादशसंख्यामनूद्य तस्यास्त्रिष्टुबात्मना प्रशंसनं, व्यामैकादशप्रक्रमकृताया वेदेर्महावेदियोनित्वेन प्रशंसनं, महावेदेर्मानविधानं, नवतिप्रक्रमवेदेः सप्तविधाग्नेश्च संख्यासम्पत्तेर्वेदवादिविचारमुखेन प्रदर्शनं, अष्टविधनवविधादिपुरुषप्रमाणानामेकशतविधपर्यन्तानामग्नीनां व्यामैकादशप्रक्रमा प्राकृती वेदिः किं पुरुषसंख्यया वर्धयितव्या आहोस्विन्न वेति संशयं व्युदसितुं सहेतुकयोः पूर्वोत्तरपक्षयोः प्रतिपादनं, उक्तस्य योनिभूताया वेदेरुत्तरत्र वर्धमानाभावस्यैव पुनर्व्यतिरेकमुखेन प्रदर्शनं, सप्तविधप्राकृताग्निवेदेरावृत्तिविशेषणस्य विधानं, अग्निमानं वक्तुं सर्वेषां सप्तविधाद्येकशतपर्यन्तानामग्नीनामिष्टकोपधानप्रदेश एतावान्महावेदिषु भवतीति सङ्ग्रहेण प्रदर्शनं, अग्निविषयकवेदिमानस्योपसंहारः, चित्याग्नेः प्रकारान्निरूपयितुं प्रतिज्ञाकरणं, तत्राष्टनवतिपुरुषप्रमाणस्याग्नेरेतावदात्मपक्षपुच्छप्रमाणमिति प्रदर्शनं, एकशतविधाग्नेः सविशेषं प्रकारप्रदर्शनं, एतस्यैकशतपुरुषप्रमाणस्याग्नेर्नवतिप्रक्रमाया वेद्याः संख्यासम्पत्तेः प्रदर्शनं, अस्तु प्रतिपुरुषं पञ्चदशसंख्यया षट्सु षट्सु पुरुषेषु नवतिसंख्यासम्पत्तिः न त्वधिकेषु

( द ) अथातऽआश्रावणस्य । षुड्ढ वाऽ आश्रावितानि न्यक्तिर्य्युगूर्ध्वं कृपणं बहिःश्रयन्तःश्रि ॥ ५ ॥

( श्ये ) एतुद्ध वै न्युक् । ( ग्यो ) योऽयमुच्चैरादाय शनैर्निदधाति स युमिच्छेत्पापीयान्त्स्यादिति तुस्योच्चैरादाय शनैर्निदध्यात्तेन स पापीयान्भवति ॥ ६ ॥

( त्यु ) अथ हैतुत्तिर्य्युक् । ( ग्यो ) योऽयं यावत्तैवाददीत तावता निदधाति स युमिच्छेन्नैव श्रेयान्त्स्यान्न पापीयानिति तुस्य यावत्तैवाददीत तावता निदध्यात्तेन स नैव श्रेयान्न पापीयान्भवति ॥ ७ ॥

( त्यु ) अथ हैतुदूर्ध्वम् । योऽयुꣳ शनैरादायोच्चैर्निदधाति युमिच्छेच्छ्रेयान्त्स्यादिति तुस्य शनैरादायोच्चैर्निदध्यात्तेन स श्रेयान्भवति ॥ ८ ॥

अथात आश्रावणस्य । षड् ह वा आश्रावितानि । न्यक् तिर्यक् ऊर्ध्वं कृपणं बहिःश्रि अंतःश्रि ॥ ५ ॥

एतद्ध वै न्यक्, योऽयमुच्चैरादाय शनैर्निदधाति । स यमिच्छेत्पापीयान् स्यादिति; तस्योच्चैरादाय शनैर्निदध्यात् । तेन स पापीयान् भवति ॥ ६ ॥

अथ हैतत्तिर्यक्, योऽयं यावतैवाददीत तावता निदधाति । स यमिच्छेन्नैव श्रेयान् स्यान्न पापीयानिति; तस्य यावतैवाददीत तावता निदध्यात् । तेन स नैव श्रेयान्न पापीयान् भवति ॥ ७ ॥

अथ हैतदूर्ध्वम्, योऽयं शनैरादायोच्चैर्निदधाति । स यमिच्छेच्छ्रेयान् स्यादिति; तस्य शनैरादायोच्चैर्निदध्यात् । तेन स श्रेयान् भवति ॥ ८ ॥

'उपन्यच्येवैव' नीचैः कृत्वैव 'तं' मध्यमं प्राणं उपनतस्य मध्यमप्राणस्य समीपे धारयेत् । अत एवोक्तं सूत्रकृता—"नाभिदेशे धारणम्"—( का. श्रौ. सू. २ । ४४ ) इति ॥ ४ ॥

एवमाश्रावणेऽपि स्वाभिमतं पक्षं दर्शयितुं प्रस्तौति—अथात आश्रावणस्येति । यतो वक्ष्यमाणप्रकारेण तत्र भूयसी विप्रतिपत्तिरस्ति, अतः कारणात् 'अथ' तस्याश्रावणस्य विशेषानादौ संपरिचष्टे-षड्ढ वा आश्रावणानीति । 'न्यक्, तिर्यग्' इत्यादिशब्दाः तेषामाश्रावणविशेषाणां क्रमेणान्वर्थसंज्ञाः ॥ ५ ॥

तत्र प्रथमस्वरूपमाह—एतद्ध वा इति । 'योऽयं' अध्वर्युः 'उच्चैः' ऊर्ध्वस्वरेणादायाश्रावणं प्रारभ्य 'शनैः' नीचस्वरेण 'निदधाति' परिसमापयति । एतत् न्यक्संज्ञकमाश्रावणम् । एतस्य प्रयोगविषयमाह—स यमिच्छेदिति । 'यं' यजमानं द्वेष्यम् 'पापीयान्' अतिशयेन दरिद्रः 'स्यात्' इतीच्छेदध्वर्युः 'तस्य' एतदाश्रावितं येन यजमानः 'पापीयान् भवति' ॥ ६ ॥

द्वितीयमाश्रावणं लक्षयति—अथ हैतत्तिर्यगिति । 'यः अयम्' अध्वर्युः 'यावता' यावत्परिमाणेन स्वरेणाश्रावणम् 'आददीत' आरभते, तावतैव स्वरेण 'निदधाति', तस्य तत् आश्रावणं तिर्यक्संज्ञम् । तस्य प्रयोगफलमाह—स यमिच्छेदिति । श्रेयानपि न स्यात्, पापीयानपि नैव स्यात्, अपि तु मध्यस्थ एव 'भवतु' इति यं यजमानं कामयेत, तस्य एतत् तिर्यक्संज्ञकमाश्रावणं प्रयोज्यम् । स्पष्टमन्यत् ॥ ७ ॥

अथ तृतीयस्याश्रावणस्य स्वरूपमाह—अथ हैतदूर्ध्वमिति । 'अथ' खलु 'एतत्' वक्ष्यमाणं आश्रावणं





( त्यु ) अथ हैतुत्कृपणम् । ( णं यो ) योऽयमणु दीर्घमस्वरमाश्रावयति यो हैनं तुत्र ब्रूयात्कृपणं न्वाऽअयमध्वर्य्युर्य्युजमानमकद्द्विषतो भ्रातृव्यस्योपावसायिनमितीश्वरो ह तुथैव स्यात् ॥ ९ ॥

( दु ) अथ हैतुद्बहिःश्रि । योऽयमपव्यादायौष्ठाऽउच्चैरस्वरमाश्रावयति श्रीर्वै स्वरो बाह्यतऽ एव तच्छ्रियं धत्तेऽशनायुको भवति ॥ १० ॥

( त्यु ) अथ हैतुदन्तःश्रि । योऽयुꣳ सन्धायौष्ठाऽउच्चैः स्वरवदाश्रावयति श्रीर्वै स्वरोऽन्तरतऽ एव तच्छ्रियं धत्तेऽन्नादो भवति ॥ ११ ॥

अथ हैतत्कृपणम्, योऽयमणु दीर्घमस्वरमाश्रावयति । यो हैनं तत्र ब्रूयात्; कृपणं न्वा अयमध्वर्युर्यजमानमकत्; द्विषतो भ्रातृव्यस्योपावसायिनमिति । ईश्वरो ह तथैव स्यात् ॥ ९ ॥

अथ हैतत् बहिःश्रि, योऽयमपव्यादायौष्ठा उच्चैरस्वरमाश्रावयति । श्रीर्वै स्वरः । बाह्यत एव तच्छ्रियं धत्ते । अशनायुको भवति ॥ १० ॥

अथ हैतदंतःश्रि, योऽयं संधायौष्ठा उच्चैःस्वरवदाश्रावयति । श्रीर्वै स्वरः । अंतरत एव तच्छ्रियं धत्ते । अन्नादो भवति ॥ ११ ॥

'ऊर्ध्वं' योऽयमध्वर्युः 'शनैरादाय' नीचैः स्वरेणारम्य 'उच्चैर्निदधाति' उन्नतस्वरेण परिसमापयति तदाश्रावणमूर्ध्वम् । एतस्य प्रयोगविषयमाह—स यमिच्छेदिति । स्पष्टोऽर्थः ॥ ८ ॥

चतुर्थं लक्षयति—अथ हैतत् कृपणमिति । 'अथ' खलु एतदाश्रावणं कार्पण्यदोषयुक्तं, यः अयमध्वर्युः 'अणु' अल्पं कंठस्याल्पता यथा भवति तथा, दीर्घमायामवत्, 'अस्वरं' स्वररहितं क्षीणस्वरं च यथा भवति तथा 'आश्रावयति' तस्य तादृगाश्रावणं कृपणमित्युच्यते । एतस्याप्रयोज्यतामभिप्रेत्य दूषणमाह—यो हैनमिति । 'कृपणं नु वै' कृपणं दीनमिव खलु अयमध्वर्युर्यजमानं 'अकत्' कृतवान् । तथा विद्वेषणं कुर्वतः 'भ्रातृव्यस्य' शत्रोः 'उपावसायिनं' समीपे अवस्थायिनं अकार्षीदिति यः कश्चिदभिज्ञो ब्रूयात् तथैव स यजमानो भवितुमीश्वरः 'स्यात्' ॥ ९ ॥

पंचमस्याश्रावितस्य स्वरूपमाह—अथ हैतद्बहिःश्रीति । यः अयमध्वर्युः 'ओष्ठौ अपव्यादाय' अपकृष्य विश्लिष्टौ कृत्वा 'अस्वरं' उदात्तादिस्वररहितं यथा भवति तथा केवलं उच्चैर्घोषेण 'आश्रावयति' तस्य तदाश्रावणं 'बहिःश्रि' इत्युच्यते । आस्यबाह्यदेशे श्रयति वर्तते इति शब्दव्युत्पत्तिः । अथैतत् पूर्ववत् दूषयति—श्रीर्वै स्वर इति । उदात्तादिलक्षणः 'स्वरः' स 'श्रीर्वै' वेदवाक्यस्य संपद्रूपः । तत्तथा सति ओष्ठयोरपव्यादानेन स्वरस्य बहिर्भावात् 'बाह्यत एव' यजमानाद्बहिर्भूत एव देशे 'श्रियं' संपदं 'धत्ते' धारयति । स यजमानः 'अशनायुकः' क्षुत्पीडितो 'भवति' तस्मादेतदपि आश्रावणं नोपादेयमिति भावः ॥ १० ॥

षष्ठं लक्षयति—अथ हैतदंतःश्रीति । यः अयमध्वर्युः 'ओष्ठौ' 'संधाय' संकुचितौ कृत्वा 'उच्चैः

स्वर्णजयन्तीवर्षम् 2019-20

श्रीमद्वाजसनेयिमाध्यन्दिन-

# शतपथ-ब्राह्मणम्

श्रीमत्त्रयीभाष्यकार-सायणाचार्यविरचित-
वेदार्थ-प्रकाशाख्यभाष्यसमेतम्।

तत्र

चतुर्दशकाण्डात्मक उत्तरसंज्ञको
ब्रह्मविद्यानिरूपकः

## पञ्चमो भागः

केन्द्रीयसंस्कृतविश्वविद्यालयः
संसदः अधिनियमेन स्थापितः
(प्राक्तनं राष्ट्रियसंस्कृतसंस्थानम्, मानितविश्वविद्यालयः)
भारतसर्वकारस्य मानवसंसाधनविकासमन्त्रालयाधीनः

स्वर्णजयन्तीवर्षम् 2019-20

ॐ

श्रीमद्वाजसनेयिमाध्यन्दिन-

# शतपथ-ब्राह्मणम्

तत्र

## बृहदारण्यकोपनिषत्

श्रीवासुदेवब्रह्मभगवत्कृत-
वासुदेवप्रकाशिकाख्यभाष्यसमेता।
बहुभिर्विद्वद्भिः परिशोधिता च।

चतुर्दशकाण्डात्मक उत्तरसंज्ञको
ब्रह्मविद्यानिरूपकः

**पञ्चमो भागः**


## केन्द्रीयसंस्कृतविश्वविद्यालयः

संसदः अधिनियमेन स्थापितः
(प्राक्तनं राष्ट्रियसंस्कृतसंस्थानम्, मानितविश्वविद्यालयः)
भारतसर्वकारस्य मानवसंसाधनविकासमन्त्रालयाधीनः

**Published with the Financial Assistance from Central Sanskrit University, Ministry of Human Resource Development, Govt. of India**

Publisher :
**Registrar**
**Central Sanskrit University**
(Formerly Rashtriya Sanskrit Sansthan, Deemed to be University)
56-57, Institutional Area, Janakpuri, New Delhi-110058
EPABX : 28524993, 28521994, 28524995
website : www.sanskrit.nic.in

Reprint - 2002
Reprint - 2020

Price ₹ 2115-00 (Per Set)

Printed by :
**D.V. Printers**
97-U.B., Jawahar Nagar, Delhi-110007

॥ श्रीः ॥

# अथोत्तराख्ये भागे चतुर्दशकाण्डे षडध्याय्यां बृहदारण्यकोपनिषदि

## विषयाणामनुक्रमणिका ।

तत्रादिमे आगमप्रधाने मधुकाण्डे—

ब्रा॰ विषयाः पृष्ठाङ्काः | ब्रा॰ विषयाः पृष्ठाङ्काः

**प्रथमोऽध्यायः ।**

१ उद्गीथब्राह्मणं वैराजब्राह्मणं वा—तत्र च प्रथमं मृत्य्वात्मभावसाधनभूतयोः कर्मज्ञानयोर्यत उद्भवस्तस्योद्भावकस्योपास्यस्य प्राणस्य स्वरूपनिर्णायिकाया आख्यायिकायाः कथनं, तस्यां च देवा असुराश्चेति द्विप्रकाराः प्राजापत्यास्तेऽन्योन्यमस्पर्द्धन्तेत्यभिधाय तत्रासुराणां बाहुल्यात्तैरभिभूयमाना अल्पा देवाः किं कृतवन्त इत्यभिधानं, विधित्सितस्य शुद्धादिगुणविशिष्टप्राणविज्ञानस्य स्वरूपनिर्द्धारणाय परीक्षाप्रकारनिरूपणं, तत्र क्रमेण वाक्प्राणचक्षुःश्रोत्रमनोदेवतानां परीक्षाया निरूपणम्, एवं वागादयो मृत्योरतिक्रमणेऽसमर्था इति निश्चित्याशरणाः सन्तो देवा मृत्य्वतिगमनाय मुख्यं प्राणमेव प्रार्थितवन्त इत्यभिधानं, वक्ष्यमाणैरयास्याङ्गिरसद्भिर्गुणैर्विशिष्टस्य विधानपूर्वकस्य प्राणकर्मकोपासनस्याख्यायिकां पुरस्कृत्य विविधफलस्य स्फुटीकरणं, प्राणस्य स्वतः शुद्धत्वेऽपि अशुद्धवागादिसम्बन्धादशुद्धत्वं स्यादिति शङ्कां वारयितुं पाप्महानिफलासाधारणगुणकस्य विशिष्टस्योपासनस्य निरूपणम्, अयास्यादिगुणविशिष्टप्राणविदः फलाभिधानम्, उक्तार्थस्यैव स्पष्टीकरणं, देवताभावफलाभिधानम्, एवं सामान्येनोक्तस्यातिवहनस्य प्रत्येकपरत्वेन निरूपणं, वागादीनामग्न्यादिदेवतात्वप्राप्तावपि-उपासकस्य किमायातमिति तन्निरूपणं, उपास्यस्य प्राणस्य कार्यकारणसंघातविधारकत्वस्य नामगुणान्तरस्य च सहेतुकं निरूपणम्, एवं प्राणस्यैव स्वातंत्र्येणान्नकृतोपकारभाजित्वं वागादीनां तु तद्द्वारकमिति कथं निश्चेतुं शक्यमित्याशंक्य यन्निश्चयादनेनैवेत्येवकारस्य सार्थकत्वं स्यादित्यतस्तन्निर्णयार्थाभिधानम्, एतद्गुणविज्ञानफलप्रदर्शनद्वारा फलसहितस्य गुणजातस्य निरूपणं, प्राणविद्यां स्तोतुं तद्विद्याविद्वेषिणो दोषाभिधानं, प्राणविदनुरक्तस्य लाभप्रदर्शनं च, पूर्वोक्तायास्यत्वेन प्रतिज्ञातस्याङ्गिरसत्वस्य विवरणं, बृहस्पत्यादिनामराशिधर्मकं प्राणोपासनं वक्तुं तस्य प्राणस्य क्रमादृग्यजुःसामात्मत्वस्य सोपपत्तिकं प्रतिपादनं, पुनस्तत्रास्यैव प्राणस्य प्रकारान्तरेण सामत्वस्योपासनार्थं निरूपणम्, एतद्गुणकप्राणोपासनफलस्य प्रतिपादनं च, इदं चोक्तं फलं मध्यप्रदीपन्यायेनोभयतः सम्बद्धमित्यवधायेमामेव फलश्रुतिमनुसृत्याख्यायिकयोद्गीथादिगुणान्तरस्याभिधानम्, एवमुद्गीथदेवता प्राण एवेति निर्द्धार्य

सा होवाच । ( वा ) अहं वै त्वा याज्ञवल्क्य यथा काश्यो वा वैदेहो वोग्रपुत्र उज्ज्यं धनुरधिज्यं कृत्वा द्वौ बाणवन्तौ सपत्नातिव्याधिनौ हस्ते कृत्वोपोत्तिष्ठेदेवमेवाहं त्वा द्वाभ्यां प्रश्नाभ्यामुपोदस्थां तौ मे ब्रूहीति पृच्छ गार्गीति ॥ २ ॥

सा होवाच । यदूर्ध्वं याज्ञवल्क्य दिवो यदवाक्पृथिव्या यदन्तरा

---

तौ चेन्मे विवक्ष्यति, न वै जातु युष्माकमिमं कश्चित् ब्रह्मोद्यं जेतेति । तौ चेन्मे न विवक्ष्यति। मूर्द्धाऽस्य विपतिष्यतीति । पृच्छ गार्गीति ॥ १ ॥

सा होवाच । अहं वै त्वा याज्ञवल्क्य ! यथा काश्यो वा वैदेहो वोग्रपुत्र उद्यं धनुरधिज्यं कृत्वा द्वौ बाणवन्तौ सपत्नातिव्याधिनौ हस्ते कृत्वोपोत्तिष्ठेत् । एवमेव अहं त्वां द्वाभ्यां प्रश्नाभ्यामुपोदस्थाम् । तौ मे ब्रूहीति । पृच्छ गार्गीति ॥ २ ॥

सा होवाच—यदूर्ध्वं याज्ञवल्क्य दिवः, यदवाक्पृथिव्याः, यदन्तरा द्यावापृथिवी इमे, यद्भूतं च, भवच्च, भविष्यच्च इत्याचक्षते, कस्मिँस्तदोतं च प्रोतं च इति ॥ ३ ॥

---

निर्द्धारणानन्तरं पूर्वं याज्ञवल्क्येन निषिद्धा मूर्द्धपातभयादुपरता सती पुनः प्रष्टुं ब्राह्मणानुज्ञां प्रार्थयन्ती ' ह ' किल वचक्नोर्दुहिता ' वाचक्नवी ' पुनरुवाच । किं ? हे ' ब्राह्मणा भगवन्तः ' पूजावन्तः मम वचः शृणुतेति शेषः। ' हंत ' यद्यनुमतिर्भवतामस्ति, तर्हि—' अहमिमं याज्ञवल्क्यं ' पुनर्द्वौ ' प्रश्नौ प्रक्ष्यामि ' । ' तौ ' प्रश्नौ चेद्यदि कथंचिन्मे मह्यं ' विवक्ष्यति ' विस्पष्टं कथयिष्यति । तर्हि ' जातु ' कदाचित् ' युष्माकं ' मध्ये ' कश्चित् ' कोऽप्यन्यतमः ' इमं ' याज्ञवल्क्यं ' ब्रह्मोद्यं ' ब्रह्मवदनं प्रति ' नवै ' नैव ' जेता ' जयकर्ता भवेदिति शेषः। अन्यच्च शृणुत । ' तौ ' प्रश्नौ चेद्यदि ' मे ' मह्यं ' न विवक्ष्यति ' विस्पष्टं वक्तुं समर्थो न भविष्यति। तर्हि—' अस्य ' याज्ञवल्क्यस्यैव ' मूर्द्धा ' शिरः ' विपतिष्यति ' विस्पष्टं पतिष्यतीत्येवमुक्ता ब्राह्मणा अनुज्ञां प्रददुः । ' पृच्छ गार्गि ! ' प्रश्नं कुर्विति ॥ १ ॥

सैवं लब्धानुज्ञा गार्गी ' ह ' याज्ञवल्क्यं प्रति ' उवाच ' । हे ' याज्ञवल्क्य ' ! ' त्वा ' त्वां ' अहं ' ' द्वौ प्रश्नौ प्रक्ष्यामि ' इत्यनुषज्यते । कौ ताविति जिज्ञासायां तयोर्दुस्तरत्वं द्योतयितुं दृष्टांतपूर्वकं तौ प्रश्नौ आह—यथा काश्यो वेति । ' काश्यो वा ' काशिषु भवः काश्यः लोके शूरत्वेन प्रसिद्धः । ' वैदेहो वा ' । विदेहानां राजा ' उग्रपुत्रः ' शूरान्वय इत्यर्थः । उद्यमिति । उत् ऊर्ध्वं याति गच्छति विस्तृतं भवति इत्युद्यं अवतारितज्याकं धनुश्चापं पुनरधिज्यं ' कृत्वा ' आरोपितज्याकं विधाय ' द्वौ बाणवन्तौ ' बाणशब्देन शराग्रे यो वंशखंडः सन्धीयते,स उच्यते । तेन विनाऽपि शरो भवति । अतो बाणवन्ताविति विशिनष्टि । सपत्नातिव्याधिनाविति तयोरेव विशेषणम् । सपत्नं शत्रुं अतिशयेन वेद्धुं शीलं ययोस्तौ शत्रोरतिशयेन पीडाकरौ । ईदृशौ द्वौ शरौ ' हस्ते कृत्वा ' ' उपोत्तिष्ठेत् ' शत्रोः समीपत आत्मानं दर्शयेत् । एवमेवाहं ' त्वां ' शरस्थानीयाभ्यां प्रश्नाभ्यां ' उपोदस्थां ' त्वत्समीपे उत्थितवत्यस्मि । ततस्त्वं ब्रह्मविच्चेत्तर्हि ' तौ ' प्रश्नौ तयोर्मया क्रियमाणयोः प्रश्नयोरुत्तरं ' मे ' मह्यं ' ब्रूहि ' । एवमुक्तो याज्ञवल्क्यो हे ' गार्गि ! पृच्छ ' यथेष्टं प्रश्नं कुरु । इत्युक्तवानिति शेषः ॥ २ ॥

' सा ' एवमुक्ता गार्गी ' ह उवाच ' अपृच्छत् । हे याज्ञवल्क्य ! ' यत् दिवः ' द्युसंज्ञितात् उपरितनांड-





द्यावापृथिवीऽइमे यद्भूतञ्च भवच्च भविष्यच्चेत्याचक्षते कस्मिँस्तदोतञ्च प्रोतञ्चेति ॥ ३ ॥

स होवाच । यदूर्ध्वं गार्गि दिवो यदवाक्पृथिव्या यदन्तरा द्यावापृथिवीऽइमे यद्भूतञ्च भवच्च भविष्यच्चेत्याचक्षतऽआकाशे तदोतञ्च प्रोतञ्चेति ॥ ४ ॥

सा होवाच । नमस्ते याज्ञवल्क्य यो मऽएतं व्यवोचोऽपरस्मै धारयस्वेति पृच्छ गार्गीति ॥ ५ ॥

सा होवाच । यदूर्ध्वं याज्ञवल्क्य दिवो यदवाक्पृथिव्या यदन्तरा द्यावापृथिवीऽइमे यद्भूतञ्च भवच्च भविष्यच्चेत्याचक्षते कस्मिन्नेव तदोतञ्च प्रोतञ्चेति ॥ ६ ॥

---

स होवाच—यदूर्ध्वं गार्गि दिवः, यदवाक्पृथिव्याः, यदन्तरा द्यावापृथिवी इमे, यद्भूतं च, भवच्च, भविष्यच्च इत्याचक्षते, आकाशे तदोतं च प्रोतं च इति ॥ ४ ॥

सा होवाच । नमस्ते याज्ञवल्क्य । यो म एतं व्यवोचः । अपरस्मै धारयस्वेति । पृच्छ गार्गीति ॥ ५ ॥

सा होवाच—यदूर्ध्वं याज्ञवल्क्य दिवः, यदवाक्पृथिव्याः, यदन्तरा द्यावापृथिवी इमे, यद्भूतं च, भवच्च, भविष्यच्च इत्याचक्षते, कस्मिन्नेव तदोतं च प्रोतं चेति ॥ ६ ॥

---

कपालात् ऊर्ध्वमुपरि अस्ति । यच्च ' पृथिव्याः ' अधस्तनांडकपालादवाक् अधो वर्तते । यच्च ' द्यावापृथिवी अन्तरा ' द्यावापृथिव्योरंडकपालयोर्मध्ये अस्ति । ये च ' इमे ' प्रसिद्धद्यावापृथिवी स्तः । यद्भूतमतीतं च यद्भवद्वर्तमानं स्वव्यापारस्थं च भविष्यद्वर्तमानकालादूर्ध्वभावि लिंगगम्यं च । यत्सर्वेदा एवमाचक्षते कथयंत्यागमतः । तत्सर्वं द्वैतजातं जगत् यस्मिन्नेकं भवतीत्यर्थः तत्सूत्रसंज्ञं पूर्वोक्तं ' कस्मिन्नोतं प्रोतं च ' उत्पत्तौ स्थितौ लये चेत्येवं त्रिष्वपि कालेषु पृथिवीधातुरप्स्विव वर्तत इत्यर्थः ॥ ३ ॥

' सः ' याज्ञवल्क्यः ' उवाच ' । हे ' गार्गि ! ' ' यत् ' त्वयोक्तं ' ऊर्ध्वं दिवः ' इत्यादि तत्सर्वं यत्सूत्रमचक्षते । ' तत् ' व्याकृतं जगदात्मकं सूत्रं अव्याकृतशब्दवाच्ये नारायणाख्ये अंतर्यामिणि ' ओतं च प्रोतं च ' उत्पत्तौ स्थितौ लये चेत्येवं त्रिष्वपि कालेषु पृथिवीधातुरप्स्विव वर्तत इत्यर्थः ॥ ४ ॥

' सा ' एवं अपाकृतप्रथमप्रश्ना गार्गी ' उवाच ' ' ह ' हे ' याज्ञवल्क्य ' यस्त्वं ' मे ' मम ' एतं ' दुर्वचं प्रश्नं ' व्यवोचः ' विशेषेणापकृतवान् असि । अतस्ते तुभ्यं नमोऽस्तु । ' अपरस्मै ' द्वितीयाय प्रश्नाय ' धारयस्व ' दृढीकुरु । आत्मानमित्यर्थः । इतरः आह—' पृच्छ गार्गीति ' ॥ ५ ॥

" सा होवाच यदूर्ध्वं याज्ञवल्क्य " इत्यादिप्रश्नः प्रतिवचनं चेत्युक्तस्यैवार्थस्यावधारणार्थं पुनरुच्यते—न किंचिदपूर्वमर्थांतरमित्यर्थः । गार्ग्या सर्वं यथोक्तं प्रत्युच्चार्य " कस्मिन्नेव तदोतं च प्रोतं च " इत्युक्तार्थेन वाक्येन पुनरधिकरणमेव पृष्टमित्यर्थः ॥ ६ ॥